द्वादशस्कंधः १२

द्वा०

॥श्रीमते रामानुजाय नमः॥ तदेवं नवमस्कन्धेनोपक्रान्तसूर्यवंशावलिं तदन्तरापतितसोमवंशावलिं च श्रीकृष्णावतारपर्यन्तां निरूप्य भगवतोऽवतार प्रवृत्तीः स्वधामगमनान्तानि चरितानि दशमैकादशाभ्यां निरूपितानि ॥ अथ ॥ भाविसोमवंशपरंपरोत्तरावधिं वक्तुं तत्सयाहस्तिराजा ॥ स्वधामानुगत इति ॥ यदुवंशस्य भूषणं चक्रे नाथ हे श्रीकृष्णे स्वधाम स्वस्थानमनुगते सति ततः ॥ यदुवंशजानां सोमवंश्यानां तत्कालानां मध्ये कस्य वंशोऽभवद्वंशपरंपराप्राप्तेन ॥ तदेतदुक्तं मुनिमहत्माचक्ष्व ॥ १ ॥ बार्हद्रथवंशोऽभवदित्य सनिवेदस्याविनं तमनु वर्णयिष्ये ॥ भास्वतो घोस पुरंजयो नाम भाविता ॥ स्वर्वो वंश उपरिचरो वसुस्तस्य बृहद्रथः ॥ ततस्तौ राजसंघः ॥ तस्य सहदेवस्तस्य मार्जारिः ॥ तस्य श्रुतश्रवः प्रवृत्तयः

श्रियः कान्तो जयति परीक्षिदुवाच ॥ स्वधामानुगते कृष्णे यदुवंशविभूषणे ॥ कस्य वंशोऽभवत्पृथ्व्यामेतदाचक्ष्व मे मुने ॥ १ ॥ श्रीशुक उवाच
योऽन्त्यः पुरंजयो नाम भविष्यो बार्हद्रथो नृप ॥ तस्यामात्यस्तु शुनको हत्वा स्वामिनमात्मजं ॥ २ ॥ प्रद्योतसंज्ञं राजानं कर्ता यत्पा
लकः सुतः ॥ विशाखयूपस्तत्पुत्रो भविता राजकस्ततः ॥ ३ ॥ नन्दिवर्धनस्तत्पुत्रः पञ्च प्रद्योतना इमे अष्टत्रिंशोत्तरशतं भो
क्ष्यन्ति पृथिवीं नृपाः ॥ ४ ॥ शिशुनागस्ततो भाव्यः काकवर्णस्तु तत्सुतः क्षेमधर्मा तस्य सुतः क्षेत्रज्ञः क्षेमधर्मजः ॥ ५ ॥

पुरंजयान्ताः सुता विंशतिसंख्याता भवि[illegible]तानवमस्कन्ध एवोक्ताः ॥ योऽन्त्यः कनीयान् पुरंजयो नाम बार्हद्रथवंश्यो भविता तस्य पुरंजयस्यामात्यः शुन
को नाम स्वस्वामिनं पुरंजयं हत्वा त[illegible]मजं ॥ २ ॥ प्रद्योतनामानं राजानं करिष्यति यस्य प्रद्योतनस्य पालकः सुतः तं राजानं कर्तेति सर्वेषां स
बन्धः तत्पुत्रः पालकपुत्रः वि[illegible]ः ततो राजकोऽभविष्यति ॥ ३ ॥ तत्पुत्रो राजकपुत्रः नन्दिवर्धनः ॥ तस्य तु पुत्राः पञ्च प्रद्योतनाः प्रद्योतन
संज्ञिकाः ॥ तत इमे नृपा अष्टा[illegible]सत्तरशतसमा इति शेषः ॥ अयं कालावधिः एवमधिपिन्वान्ते पालयिष्यन्ति ॥ ४ ॥ ततः प्रद्योतनेभ्यः
शिशुनागो भविता सु[illegible]सुतः काकवर्णः तस्य काकवर्णस्य सुतः ॥ क्षेमधर्मा तस्माज्जातस्तु क्षेत्रज्ञः ॥ ५ ॥

नस्याशोकवर्द्धनस्य ॥ १४ ॥ ततः मौर्यो भूमिपप्रियं कुर्वन् द्योतनेनैव ॥ तथापि पराक्रमादिभिः कृपया स्वयमोदयरक्षकः ॥ तदन्वयेन एते दश मौर्याः शतं यद्
यच्च शतम् ॥ तत्सहितान्सह दशोत्तरं शतं ॥ सप्तत्रिंशाच्छतोत्तरं सप्तत्रिंशदधिकशतं समा इत्यर्थः ॥ कुरुकुलोद्वहेति संबोधनं ॥ १५ ॥ अग्निमित्र
इति ॥ मौर्यसंज्ञकस्य बृहद्रथस्य सेनापतिः पुष्यमित्रो नाम स्वामिनं हत्वा राज्यं करिष्यति ॥ अग्निमित्रादयो नव तदंशा दशैते शुंगसंज्ञाः ॥ दशत्व
षे शताधिकं द्वादशाधिकं वर्षशतं भोक्ष्यंतीति संबंधः ॥ १६ ॥ ततः काण्वानिति हे नृप अल्पगुणान् गुणहीनान् काण्वसंज्ञान् यास्यति त

सुयशास्य भविता तस्य संगतः सुयशः सुतः ॥ शालिशूकस्ततस्तस्य सोमशर्मा भविष्यति ॥ १४ ॥ शतधन्वा सुतस्तस्य भविता तद्बृहद्रथः ॥ मौ
र्या ह्येते दश नृपाः सप्तत्रिंशच्छतोत्तरं ॥ १५ ॥ समा भोक्ष्यंति पृथिवीं कलौ कुरुकुलोद्वह ॥ अग्निमित्रस्ततस्तस्मात्सुज्येष्ठो भविता ततः ॥ १६
वसुमित्रो भद्रकश्च पुलिंदो भविता ततः ॥ ततो घोषः सुतस्तस्माद्वज्रमित्रो भविष्यति ॥ १७ ॥ ततो भागवतस्तस्माद्देवभूतिः कुरूद्वह ॥ शुंगा दशैते भो
क्ष्यंति भूमिं वर्षशताधिकं ॥ १८ ॥ ततः काण्वानियं भूमिर्यास्यत्यल्पगुणान्नृप ॥ शुंगं हत्वा देवभूतिं काण्वोमात्यस्तु कामिनं ॥ १९ ॥ स्वयं करिष्यते राज्यं
वसुदेवो महामतिः ॥ तस्य पुत्रस्तु भूमित्रस्तस्य नारायणः सुतः ॥ २० ॥ काण्वायना इमे भूमिं चत्वारिंशच्च पंच च ॥ शतानि त्रीणि भोक्ष्यंति वर्षाणां च कलौ
युगे ॥ २१ ॥ हत्वा काण्वं सुशर्माणं तद्भृत्यो वृषलो बली ॥ गां भोक्ष्यत्यंध्रजातीयः कंचित्कालमसत्तमः ॥ २२ ॥ कृष्णनामाथ तद्भ्राता भविता पृथिवीपतिः ॥ २३

दधीनामुद्धिष्यतीति ॥ पालितान्भविष्यतीत्यावत् ॥ केद्वन ते काण्वाः कथं च तानस्यतीत्यत आह शुंगमिति सार्द्धद्वयेन ॥ शुंगसत्रो देवभूतिस्तं का
मिनं स्त्रीलालसं हत्वा तदमात्यः काण्ववसुदेवो नाम स्वयमेव करिष्यति ॥ महामतेरिति पाठे संबोधनं ॥ तस्येति भूमेव वसुदेवादय ॥ काण्वायनसंज्ञाः
पंचचत्वारिंशदधिकान्यातत्रसंसमाः ॥ गां भोक्ष्यंतीत्यर्थः ॥ १९ ॥ अत्र नारायणस्य सुतः सुशर्मा नाम द्रष्टव्यः ॥ हत्वा काण्वं सुशर्माणं तद्भृत्यो रथं यानुरोध
त ॥ २० ॥ २१ ॥ तद्भृत्यः सुशर्मणो वृषलो बली बलीयान् नाम्ना गां पृथ्वीं ॥ कंचित्कालमिति अस्य सत्त्वात् तद्भोगकालस्यानादरेण संख्या न कृता ॥ २२ ॥ कृष्णना

विधिसार इति तस्यक्षेत्रज्ञस्याजातशत्रुरिति तस्य विधिसारादित्यादिः तत्सुतः अजातशत्रुसुतः ॥६॥ नंदिवर्द्धन इति ॥ अजेयः अजयस्यात्मजः त
त्सुतः नंदिवर्द्धनसुतः ॥७॥ कुरुश्रेष्ठेति संबोधनं महानंदिसुत इति हे राजन् ॥८॥ महापद्मपतिरिति नवयेन नाम महापद्मसंख्यायाः सेनाया धनस्य
वा पतिरिति सच शूद्रागर्भोद्भवः बली अधिकबलयुक्तः सर्वक्षत्रकुलविनाशकृच्च ॥ नंद इति तस्यैव नामांतरं यतोऽयं शूद्रागर्भोद्भवः अत एव तत
आरभ्य नृपाः ॥ शूद्रायाम् अधार्मिकाश्च भविष्यंति ॥९॥ स इति स महापद्म इति नामैकदेशग्रहणं ॥ महापद्मपतिः ॥ अनुल्लंघितशासनः प्रजाभिर
नुल्लंघितं शासनं यस्य सः ॥ एकमेव छत्रं यस्यां तथाभूतां पृथ्वीं भोक्ष्यति पालयिष्यति द्वितीयो भार्गवः परशुराम एव ॥१०॥ तस्यैवेति

विधिसारसुतस्तस्याजातशत्रुर्भविष्यति ॥ दर्भकस्तत्सुतो भावी दर्भकस्याजयः स्मृतः ॥६॥ नंदिवर्द्धन आजेयो महानंदिसुतस्ततः ॥ शिशुनाग
[illegible]सुतस्ततस्त्रयं ॥७॥ समा भोक्ष्यंति पृथिवीं कुरुश्रेष्ठ कलौ नृपाः ॥ महानंदिसुतो राजन् शूद्रागर्भोद्भवो बली ॥८॥ महापद्मपति[illegible]
[illegible]नंदः क्षत्रविनाशकृत् ततो नृपा भविष्यंति शूद्रप्राया ह्यधार्मिकाः ॥९॥ स एकच्छत्रां पृथिवीमनुल्लंघितशासनः ॥ शासिष्यति महापद्मो द्वि
तीय इव भार्गवः ॥१०॥ तस्यैवाष्टौ भविष्यंति सुमाल्याद्यास्तु ते सुताः ॥ य एव भोक्ष्यंति महीं राजानः स्म शतं समाः ॥११॥ नव नंदान् द्विजः कश्चित्प्रपन्नां
नुद्धरिष्यति ॥ तेषामभावे जगतीं मौर्या भोक्ष्यंति वै कलौ ॥१२॥ स एव चंद्रगुप्तं वै द्विजो राज्येऽभिषेक्ष्यति ॥ तत्सुतो वारिसारस्तु ततश्चाशोकवर्द्धनः ॥१३॥

सुमाल्यप्रमुखाः सुताः इति शिष्यः इति सहस्रं वत्सरान् ॥११॥ नवनंदानिति नंदः तत्सुताः परस्य आत्मवेद्यत्र इति संख्यानुरोधात् एत एव नंदा
निमित्तक्रुद्धवचनं नवेति नराधिपेण वनान्तपन्नानि स्वस्तान कश्चिद्द्विजस्तु भालुकः ॥ कौटिल्यवात्स्यायनाख्यः ॥ द्विजउद्धरिष्यति उन्मूलयिष्यति ना
शयिष्यतीति यावत् ॥ ततस्तेषां सपित्र्यकाणां सुमाल्यप्रमुखानामभावे तेषु निःक्रांतेषु इत्यर्थः एव सोमवंशः समाप्तः मौर्यसंज्ञाः भोक्ष्यंति ॥१२॥ के
चन्द्रगुप्तास्ते मौर्याः कथं च भोक्ष्यंति तत्राह स एवेति ॥ यस्तेषां नवानामुद्धर्ता द्विज ॥ स एव मौर्यसंज्ञं प्रथमं चंद्रगुप्तं नाम स्वसुतं राज्येऽभिषेक्ष्य
ति तत्सुतः चंद्रगुप्तसुतः तत वारिसारात् अनंतरं तत्सुतः अशोकवर्द्धनसंज्ञः ॥१३॥

तेषां सूतनंदादीनां बाल्हीकसंज्ञास्त्रयोदश सुताः भवितारो भविष्यंतीति तत्र पुष्पमित्रो नाम्ना राजन्यः अस्य दुर्मित्रनामा पुत्रः ॥ २२ ॥ तथा ध्राः कोशलाश्च विदूरपतयः निषधाश्च तत्तद्देशनामभिः प्रख्याताः खंडमंडलेषु भूपालास्तत एव बाल्हीकेभ्य एव भविष्यंतीति ते तेभ्यो जनिष्यंते इत्यर्थः ॥ २४ ॥ मागधानामिति ततस्तु मागधानां राजा विश्वस्फूर्जिर्नाम भविता स च पूर्वोक्तात्पुरंजयादपरः पुरंजय इति प्रसिद्धः सन् वर्णान् ब्राह्मणादीन् पुलिंदयदुमद्रकसंज्ञान् म्लेच्छप्रायान् करिष्यति अपरानिति अस्मात्पुलिंदसंज्ञान् करिष्यतीत्यर्थः ॥ २५ ॥ स चैवं कृत्वा प्रजाश्चाब्रह्मभूयिष्ठा अब्रह्मवर्णप्रचुराः स्थापयिष्यति पालयिष्यति किंच वीर्यवानिति स वै विश्वस्फूर्जिः निर्मूलक्षत्रियाः पद्मवत्यां पुरि वसन्निति शेषः ॥ २६ ॥

तेषां त्रयोदश सुता भवितारश्च बाल्हिकाः ॥ पुष्पमित्रोऽथ राजन्यो दुर्मित्रोऽस्य तथैव च ॥ २२ ॥ एककाला इमे भूपाः सप्तांध्राः सप्त कौशलाः ॥ विदूरपतयो भाव्या नैषधास्तत एव हि ॥ २४ ॥ मागधानां तु भविता विश्वस्फूर्जिः पुरंजयः ॥ करिष्यत्यपरो वर्णान्पुलिंदयदुमद्रकान् ॥ २५ ॥ प्रजाश्चाब्रह्मभूयिष्ठाः स्थापयिष्यति दुर्मतिः ॥ वीर्यवान्क्षत्रमुत्साद्य पद्मवत्यां स वै पुरि ॥ २६ ॥ अनुगंगमाप्रयागं गुप्तां भोक्ष्यति मेदिनीं ॥ सौराष्ट्रावंत्याभीराश्च शूरा अर्बुदमालवाः ॥ २७ ॥ व्रात्या द्विजा भविष्यंति शूद्रप्राया जनाधिपाः ॥ सिंधोस्तटं चंद्रभागां कौंतीं काश्मीरमंडलं ॥ भोक्ष्यंति शूद्रा व्रात्याद्या म्लेच्छाश्चाब्रह्मवर्चसः ॥ तुल्यकाला इमे राजन्म्लेच्छप्रायाश्च भूभृतः ॥ एतेऽधर्मानृतपराः फल्गुदास्तीव्रमन्यवः ॥ २८ ॥

शेषः ॥ २६ ॥ अनुगंगं गंगाद्वारमारभ्य प्रयागपर्यंतां गुप्तां मेदिनीं भोक्ष्यति तदनंतरं च सौराष्ट्रादिदेशवर्तिनो द्विज ॥ २७ ॥ व्रात्याः उपनयनादिसंस्काररहिताः अत एव शूद्रप्राया भविष्यंति जनाधिपेति संबोधनं जनाधिपा इति पाठे ते शूद्रप्रायाः शूद्रप्रचुरा भविष्यंतीत्यर्थः ॥ २८ ॥ सिंधोरिति व्रात्याद्या व्रात्या अब्रह्मण्या येषां ते शूद्रा म्लेच्छाश्च अब्रह्मवर्चस इति असामर्थ्यप्रचितत्वाद्व्रात्यविशेषणं चंद्रभागानदीतयातटभीरं लक्ष्यते कौंतीरदेशान् कौंतीमिति पाठे कुंतिदेशेषु भवां कौंतीमिति चंद्रभागाविशेषणं तुल्यकाला इति एते म्लेच्छप्रायाः अस्मत्तस्तुल्यकाला भविष्यंतीत्यर्थः किंच एत इति अधर्मेऽनृते च पराः निष्ठिताः फल्गुदाः अल्पदातारः तीव्रः क्रोधो मन्युर्येषां ते ॥ २९ ॥

२४ अनिष्टकर्मेति तस्याद्दमानस्यानिष्टकर्मा सुत इति सर्वैः संबंधः ॥ हालेयो निष्टकर्मणः सुत इति ॥२५॥ चकोर इति यत्रयेषु वल्लीकसंज्ञेषु
शिवस्वातिर्नामनवितेत्यर्थः ॥ अरिंदमेति संबोधनं सविसर्गपाठे शिवस्वातेर्विशेषणं ॥२६॥ २७ एत इति ॥ एते वल्लीकनामानः पंचविंशति
नृपतयः ॥ पृथ्वीं भोक्ष्यंतीति संबंधः ॥ वर्षसंख्यामाह त्रिंशच्छतानि षट्पंचाशच्चेति षड्भिः सुत इत्यन्वयः ॥ शतं वर्षाणीत्यर्थः ॥२८
सप्तेति ॥ ततः सप्ताभीरसंज्ञा गाथा इति ततरेणान्वय ॥ तान्विशिनष्टि आवभृत्या अवभृतिनगरी तस्या राजानः ॥ आवभृत्यसंज्ञा वा सप्त

शांतकर्णस्तत्सुतः ॥ पौर्णमासस्तु तत्सुतः ॥ लंबोदरस्तु तत्सुतस्तस्माद्विविलको नृपः ॥ मेघस्वातिर्विविलकाद्दमानस्तु तत्सुतः ॥२४॥ अनि-
ष्टकर्मा हालेयस्तलकस्तस्य चात्मजः ॥ पुरीषभीरुस्तत्सुतस्ततो राजा सुनंदनः ॥२५॥ चकोरो बहवो यत्र शिवस्वातिररिंदमः ॥ तस्यापि गोमती
पुत्रः पुरीमान्भविता ततः ॥२६॥ मेदशिराः शिवस्कंधो यज्ञश्रीस्तत्सुतस्ततः ॥ विजयस्तत्सुतो भाव्यश्चंद्रविज्ञः सलोमधिः ॥२७॥ एते त्रिंशन्नृप-
तयश्चत्वार्यब्दशतानि च ॥ षट्पंचाशच्च पृथिवीं भोक्ष्यंति कुरुनंदन ॥२८॥ सप्ताभीरा आवभृत्या दशगर्दभिनो नृपाः ॥ कंकाः षोडश भूपाला भवि-
ष्यंत्यतिलोलुपाः ॥२९॥ ततोऽष्टौ यवना भाव्याश्चतुर्दश तुरुष्ककाः ॥ भूयो दश गुरुंडाश्च मौना एकादशैव तु ॥३०॥ एते भोक्ष्यंति पृथिवीं दशवर्षश-
तानि च ॥ नवाधिकां च नवतिं मौना एकादश क्षितिं ॥३१॥ भोक्ष्यंत्यब्दशतान्यंग त्रीणि तैः संस्थिते ततः ॥ किलिकिलायां नृपतयो भूतनंदोऽथ वंगि-
रिः ॥३२॥ शिशुनंदिश्च तद्भ्राता यशोनंदिः प्रवीरकः ॥ इत्येते वै वर्षशतं भविष्यंत्यधिकानि षट् ॥३३॥

त्या ॥ तान्विशिनष्टि आभीरजातीयाः ततो दश गर्दभिनः ॥ तत्संख्यया एव संख्येयाः अतिलोलुपाः कामिनः ॥२९॥ एते भोक्ष्यंतीति मौना एकादश क्षि-
तिं ॥ दश वर्षशतानि नवाधिकां च नवतिं इत्येकोनैकादशशता-
नि ग्रहीतो मौनास्तावंतं कालावधिं ॥ पृथक् चैव वक्ष्यमाणसाहित्य इत्येतेनेत्यर्थः ॥ एकादश मौना ... ॥ किलिकिलायामिति किलिकि-
लायां पुरीत्यर्थः ॥३१॥ भोक्ष्यंतीति ... संस्थिते नष्टे इति ... ॥३२॥ ३३॥
ला नाम पुरी तस्यां भूतनंदादयो नृपतयः ॥ भूतनंदादयः षट् ... शतं वर्षाणि भोक्ष्यमाणा भविष्यंति

नं० द्व० टी०

४

सूत्रमेव न तूपनयनादि लिंगमेवेत्याश्रमाणां ख्यातौ ज्ञाने लिंगमेव दंडाजिनादिकमेव हेतुर्न त्वाचारविशेषः ॥ अन्योन्यापत्तिकारणमाश्रमादाश्र
मांतरप्राप्तौ च कारणं वर्णाद्वर्णांतरप्राप्तौ नीचोत्तमभावप्राप्तौ चाकारणं इत्यर्थः ॥ अवृत्तिर्दरिद्रता तया न्यायदौर्बल्यं पराजयः सम्यक्तत्पाठे
तस्यां सत्यां न्यायदौर्बल्यं सा न्यायदौर्बल्ये हेतुरित्यर्थः ॥ पांडित्ये चापलं वचः बहुभाषणं हेतुः ४ ॥ अवृत्त्यैनाढ्यतेति ॥ असाधुत्वे नीचत्वे ऽनाढ्यतैव
हेतुः न तु कुजहीनता साधुत्वे उत्कृष्टत्वे दंभः दृहालंकारः उद्वाहे विवाहे स्वीकार एव न तु शास्त्रीयविधिः प्रसाधनं शरीरमलापनयनमेव स्नानं न
तु विशुद्धतीर्थावगाहनं ५ ॥ दूरे वर्त्तमानं वार्ययनं जलाशयस्तत्तीर्थं न तु गंगादिर्गुर्वादिर्वा ॥ लावण्ये निमित्ते केशधारणं न तु शास्त्रविहितं ग

लिंगमेवाश्रमख्यातावन्योन्यापत्तिकारणं ॥ अवृत्त्या न्यायदौर्बल्यं पांडित्ये चापलं वच ॥ ४ ॥ अनाढ्यतैवासाधुत्वे साधुत्वे दंभ एव तु
स्वीकार एव चोद्वाहे स्नानमेव प्रसाधनं ॥ ५ ॥ दूरे वार्ययनं तीर्थं लावण्ये केशधारणं ॥ उदरंभरता स्वार्थः सत्यत्वे धार्ष्ट्यमेव हि ६
दाक्ष्ये कुटुंबभरणं यशोर्थे धर्मसेवनं ॥ एवं प्रजाभिर्दुष्टाभिराकीर्णे क्षितिमंडले ॥ ब्रह्मविट्क्षत्रशूद्राणां यो बली भविता नृ
पः ॥ ७ ॥ प्रजा हि लुब्धै राजन्यैर्निर्घृणैर्दस्युधर्मभिः ॥ आच्छिन्नदारद्रविणा यास्यंति गिरिकाननं ॥ ८ ॥ शाकमूलामिषक्षौद्रफलपुष्पा
ष्टिभोजनाः ॥ अनावृष्ट्या विनंक्ष्यंति दुर्भिक्षकरपीडिताः ॥ ९ ॥ शीतवातातपप्रावृड्हिमैरन्योन्यतः प्रजाः ॥ क्षुत्तृड्भ्यां व्याधिभिश्चैव संत
प्स्यंते च चिंतया ॥ १० ॥

विहितं गौरं उदरभरणमेव सर्वपुरुषार्थः सत्यत्वे सत्यवादित्वे धार्ष्ट्यं प्रसहिष्णुत्वं न त्वनृतवादित्वं ॥ ६ ॥ दाक्ष्ये समर्थत्वे कुटुंबभरणं न तु धर्मादि तु रु
कार्यसंपादनं यशोर्थं न तु परलोकार्थं ॥ एवं प्रजाभिरिति एवं इत्थंभूताभिः प्रजाभिराकीर्णे भूमंडले ये ब्राह्मणादयः तेषां मध्ये यो बली स एव नृपो
भविता ७ ॥ प्रजा हीति ॥ लुब्धैरर्थकामपरैरत एव निर्घृणैर्निःकृपैः दस्युधर्मभिः चौरव्याघ्रसदृशै राजन्यैराच्छिन्ना अपहृता दारा द्रविणानि च या
सां ताः प्रजा गिरिकाननं यास्यंति ८ ॥ तत्र शाकादिभोजनाः तत्र क्षौद्रं मधु अष्टिर्बीजं तत्राप्यनावृष्ट्या यो दुर्भिक्षकरः शाकाद्यभावकरः का
लस्तेन यद्वा दुर्भिक्षे यो करः स्वामिग्राह्यो भागः तेन पीडिताः ९ ॥ शीतादिभिरन्योन्यतश्च पीडिताः नंक्ष्यंति उग्रव्याधिभिः ममैव केवलं न तु वहिः इत्य
भिप्रायेण प्राप्ताद्वितु कं तृतीयां नाम सामर्थ्यापि सामर्थ्यात्पीडिता इत्यनेन संबंधः तत्र संतापस्त्रिविधः तापः ॥ १० ॥

स्त्रीबालेति॥ परदारधनयोरादृता आदरयुक्ताः तत्र हरणशीला इत्यर्थः॥ उदितास्तमितप्राया उदितप्राया अस्तमितप्रायाः क्षणेन दृष्टाः क्षणेन
नष्टा इत्यर्थः॥ अल्पसत्त्वा अल्पबला अल्पायुषश्च॥४२॥ असंस्कृता गर्भाधानादिसंस्काररहिताः॥ प्रजा इति॥ एवंविधाः ते प्रजाः भक्षयिष्यं
तिपीत्र क्षिष्यंति॥४३॥ तन्नाथा इति॥ ते म्लेच्छा नाथा येषां ते जनपदा देशावर्त्तिनः॥ तेषामेव शीलं स्वभावः आचारो वादश्च येषां संति तथा॥ अन्यो
न्यतः परस्परतः राजभिश्च पीडिताः॥ नाशं यास्यंति॥४४॥ इति द्वादशे प्रथमः॥१॥ तच्छीलाचारवादिन इत्येतदेव प्रपंचयन् कलियुगप्रवृत्तिं समीप॥

स्त्रीबालगोद्विजघ्नाश्च परदारधनादृताः॥ उदितास्तमितप्राया अल्पसत्त्वाल्पकायुषः॥४२॥ असंस्कृताः क्रियाही
ना रजसा तमसावृताः॥ प्रजास्ते भक्षयिष्यंति म्लेच्छा राजन्यरूपिणः॥४३॥ तन्नाथास्ते जनपदास्तच्छीलाचारवा
दिनः॥ अन्योन्यतो राजतश्च क्षयं यास्यंति पीडिताः॥४४॥ इति श्रीमद्भागवते महापुराणे द्वादशस्कंधे बाहडप्रवेशाव
नंनाम प्रथमोऽध्यायः॥१॥ श्रीशुक उवाच॥ ततश्चानुदिनं धर्मः सत्यं शौचं क्षमा दया॥ कालेन बलिना राज
न्नंक्ष्यत्यायुर्बलं स्मृतिः॥१॥ वित्तमेव कलौ नृणां जन्माचारगुणोदयः॥ धर्मन्यायव्यवस्थायां कारणं बलमेव हि॥२॥ दांपत्ये
ऽभिरुचिर्हेतुर्मायैव व्यावहारिके॥ स्त्रीत्वे पुंस्त्वे च हि रतिर्विप्रत्वे सूत्रमेव हि॥३॥ श्रीरामकृष्णाय॥

कालं लक्षयन् तत्प्रवृत्तिप्रकारं कलियुगप्रादुर्भावलक्षणं च वदन् राजवंशानुकीर्त्तनमुपसंहरति॥ द्वितीये ततश्चेत्यादिना॥ हे राजन् बलिना बलीयसा
कालेन निमित्तेनानुदिनं धर्मादयो नंक्ष्यंति॥१॥ वित्तमेवेति जन्माभिजात्यं गुणः सद्गुणः तदावहं वित्तमेवेत्यर्थः॥ तथा धर्मन्याययोर्व्यवस्थायां बलं धनब
लमेव कारणं हेतुः॥२॥ दांपत्ये इति दांपत्ये जातौ नार्यत्वेऽभिरुचिरेव कारणं नत्वाभिजात्यादि॥ व्यावहारिके क्रयविक्रयादिव्यापारे मायावंचनमेव निष्काप
ट्यं व्यावहारिकीति पाठे लोकव्यवहारसिद्धा मायैव विवेकप्रतिबंधिनीत्यर्थः॥ स्त्रीत्वे पुंस्त्वे च तयोः आश्रयस्य रतिः॥ कौशलमेव हेतुर्न तु स्त्रीत्वपुंस्त्वे कांत
गुणवृत्तयः॥३॥

तसु चेष्टितस्म तु वर्णयति द्वाभ्यां ॥ अश्वमिति देवदत्तनामानमाशुगच्छतीति तथा तमश्वमारुह्य असिनाऽसाधून्दमयतीति तथा दस्यून्को
टिशो निहनिष्यतीत्युत्तरेण संबंधः ॥ अष्टैश्वर्याण्यणिमादीनि गुणाः शौर्यवीर्यादयः तैरन्वितः ॥१८॥ आशुना शीघ्रगतिनाश्वेन क्षोण्यां पृथि
व्यां विचरन्नृपलिंगच्छदो राजवेषच्छन्नः ॥१९॥ अथेति अखिलेषु दस्युषु हतेषु सत्सु अथ तेषां पौरजानपदानां जनानां वासुदेवस्य कल्केर्यो
ऽङ्गरागः तस्य योऽतिशयितः पुण्यगंधवायुः तं स्पृशंतीति तथा हेतुगर्भमिदं अतः मनांसि विशदानि निर्मलानि भविष्यंति ॥२०॥ तेषां विशदमनसानां

अश्वमाशुगमारुह्य देवदत्तं जगत्पतिः ॥ असिनाऽसाधुदमनेनाष्टैश्वर्यगुणान्वितः ॥१८॥ विचरन्नाशुना क्षोण्यां हयेनाप्रतिमद्युतिः
नृपलिंगच्छदो दस्यून्कोटिशो निहनिष्यति ॥१९॥ अथ तेषां भविष्यंति मनांसि विशदानि वै ॥ वासुदेवांगरागातिपुण्यगंधानिल ॥
स्पृशां ॥२०॥ पौरजानपदानां वै हतेष्वखिलदस्युषु तेषां प्रजाविसर्गश्च स्थविष्ठः संभविष्यति ॥२१॥ वासुदेवे भगवति सत्वमूर्त्तौ हृ
दिस्थिते ॥२२॥ यदाऽवतीर्णो भगवान्कल्किर्धर्मपतिर्हरिः ॥ कृतं भविष्यति तदा प्रजासूतिश्च सात्विकी ॥२३॥ यदा चंद्रश्च सूर्यश्च
तथा तिष्यबृहस्पती एकराशौ समेष्यंति तदा भवति तदा भवति तदैव कृतं ॥२४॥ येऽतीता वर्त्तमाना ये भविष्यंति च पार्थिवाः ते त उद्देश
तः प्रोक्ता वंशीयाः सोमसूर्ययोः ॥२५॥

प्रजाविसर्गः पुत्रादिरूपः प्रपंचः स्थविष्ठः स्थूलः संभविष्यति ॥२१॥ वासुदेवे इति हृदिस्थिते इत्यस्य मनश्च भविष्यतीति शेषः ॥२२॥ तदा पुनः कृत
युगप्रवृत्तिमाह यदेति धर्मपतिर्धर्मगोप्ता कल्किर्यदाऽवतीर्णः तदा कृतयुगं भविष्यति तदा प्रजानां सूतिः प्रसूतिः सात्विकी सत्वगुणप्रधाना ॥२३॥ कृत
युगप्रवृत्तिकालोपलक्षणमाह यदेति तिष्यः पुष्यः यदा सूर्यादयश्चत्वारः एकराशौ संगता भवंति तदा ततः कृतयुगं प्रवर्त्तत इत्यर्थः ॥
२४ स्कंधद्वयार्थमुपसंहरति सोमसूर्ययोर्वंशे यावंशप्रभवाः ते तुभ्यं उद्देशतस्तत्यतिक्रमतः संक्षेपतो वा प्रोक्ताः ॥२५॥

येतीताइति

इत्थं पीडितानां नृणां परमायुर्विंशति त्रिंशद्वर्षाणि ॥ पाषंडप्रचुरे इत्यादिसप्तम्यंतानां इत्थं कलौ गतप्राये समासप्राये सतीति पंचमेन संबंधः ॥२१॥ वर्णाश्र
माचारहीनानामपि वेदपथे वेदमार्गे तदुक्ते धर्मे च नष्टे सति ॥२२॥ राजसु दस्युप्रायेषु चौरधर्मेषु सत्सु ॥ तदेव विवृणोति चौर्येति वर्णेष्वित्यस्य विशेषणं वा
चौर्यादिनानावृत्तयो येषां तेषु ॥ धेनुषु छागप्रायासु प्रमाणतः क्षीरतश्चाजातुल्यासु ॥ आश्रमेषु गृहप्रायेषु तद्वन्नैष्ठुर्यधर्मपरेषु सत्सु बंधुषु योनिप्रायेषु
योनिसंबंधमात्रप्रधानेषु ॥२३॥ ओषधिषु धान्येषु अणुप्रायासु अतिसूक्ष्मासु स्थास्नुषु वृक्षेषु शमीप्रायेषु परिमाणतः छायातः फलतश्च तत्तुल्येषु इत्यर्थः
मेघेषु विद्युत्प्रायेषु तडित्कृत्स्नेषु सद्मसु गृहेषु शून्यप्रायेषु अतिथिभोजनादिधर्मरहितेषु सत्सु ॥२४॥ इतीत्थं खरधर्मिणि दुःसहचेष्टिते कलौ सत्त्वेन

त्रिंशद्विंशति वर्षाणि परमायुः कलौ नृणां ॥ पाषंडप्रचुरे धर्मे दस्युप्रायेषु राजसु चौर्यानृतवृथाहिंसानानावृत्तिषु वै नृषु ॥२१॥ क्षीयमाणेषु देहे
षु देहिनां कलिदोषतः ॥ वर्णाश्रमवतां धर्मे नष्टे वेदपथे नृणां ॥२२॥ शूद्रप्रायेषु वर्णेषु छागप्रायासु धेनुषु ॥ गृहप्रायेष्वाश्रमेषु यौनप्रायेषु बंधुषु
॥२३॥ अणुप्रायास्वोषधिषु शमीप्रायेषु स्थास्नुषु विद्युत्प्रायेषु मेघेषु शून्यप्रायेषु सद्मसु २४ इत्थं कलौ गतप्राये जनेषु खरधर्मिणि ॥ धर्मत्राण
यसत्त्वेन भगवानवतरिष्यति ॥२५॥ परावरगुरोर्विष्णोरीश्वरस्याखिलात्मनः धर्मत्राणाय साधूनां जन्मकर्मापनुत्तये ॥२६॥ शंबलग्राममुख्यस्य ब्रा
ह्मणस्य महात्मनः भवने विष्णुयशसः कल्किः प्रादुर्भविष्यति ॥२७॥

शुद्धसत्त्वमयेन देहेन ॥२५॥ धर्मत्राणायेत्यनेन धर्मपरित्राणमेवावतारप्रयोजनमित्युक्तं तदेव सहेतुकमुपपादयति परावरगुरोरिति ॥ विशेषणानि हेतु
गर्भविशेषणानि ॥ गुरुशब्देन हितप्रवर्तकत्वमभिप्रेतं तस्य सर्वविषयकत्वमभिप्रेतं तस्य सर्वविषयकत्वस्फोरणायाखिलात्मन इत्युक्तं आ
त्मत्वं न केवलमेतत् अविरूपधारकत्वमेवापि तु तत्प्रशासनकर्तृत्वमिति द्योतनायेश्वरस्येत्युक्तं एवंभूतस्य विष्णोर्जन्मावतारः ॥ साधूनां धर्मत्राणाय
तत्प्रयोजनमाह कर्मापनुत्तय इति ॥ निःश्रेयसप्रतिबंधिकर्मनिवर्तनाय दुष्कर्मनिवर्तनाय वा विनाशाय च दुःकृतामित्युक्ते ॥२६॥ क्वावतरिष्यति किं
तस्य नामेत्यत आह ॥ शंबलस्येति ॥ शंबलाख्यग्राममुख्यस्य श्रेष्ठस्य विष्णुयशसः ॥ भवने गृहे कल्किस्तन्नामावतरिष्यति ॥२७॥

न० द० टी०

लब्धुं मे बाहयावदिति ॥ सः श्रीकृष्णः कलिः कलिपुरुषः पृथिवीं पराक्रांतुमभिभवितुं नाशकत् स्वकार्यक्षमो न बभूवेत्यर्थः ३० ॥ सूचितमर्थं स्पष्टम
ह यदा देवर्षय इति ॥ मघासु विचरंति तासां समजवे चरितुमारब्धवंत इत्यर्थः ॥ तदा कलियुगः तस्य परिमाणं द्वादशशतात्मक इति दिव्येन माने
न संधिसंध्यांशसहयो द्वादशाब्दशतात्मकः । स कलिः प्रवृत्त इति संबंधः ३१ ॥ कस्मात्तर्हि कलिधर्मा न दृष्टा इत्यतस्तान्नु लक्षणेनाह यदा मघाभ्य इति ॥
पंचमी तस्मात् देशं विहाय पूर्वं फाल्गुन्यां स मदेशं यास्यंतीत्यर्थः ३२ ॥ पराक्रांतुं न चाशकदित्यनेन प्रविष्टस्यापि कलेर्नैर्बल्याद्धस्यर्गप्रभावात्स्वका
र्याक्षमत्वमुक्तं तत्रापि जन्मा [illegible] बाह यदीति ॥ यस्मिन्निति यस्मिन्नहनि यातः तस्मिन्नेवाहनि तत्रापि तस्मिन्नेव क्षणे कलियुगं प्रतिपन्नं स्वकार्यकरणे
प्रवृत्तं प्राहुः पुराविदः कालात्मज्ञाः ३३ ॥ कलेरनंतरं कृतयुगप्रवेशमाह दिव्याब्दानामिति ॥ चतुर्थे कलौ युगे दिव्यानामब्दानां सहस्रे तस्यांते दिव्ये

यावत्स पादपद्माभ्यां स्पृशन्नास्ते रमापतिः । तावत्कलिर्वै पृथिवीं पराक्रांतुं न चाशकत् ३० ॥ यदा देवर्षयः सप्त मघासु विचरं
ति हि । तदा प्रवृत्तस्तु कलिर्द्वादशाब्दशतात्मकः ३१ ॥ यदा मघाभ्यो यास्यंति पूर्वाषाढां महर्षयः । तदा नंदात्प्रभृत्येष कलिर्वृ
द्धिं गमिष्यति ३२ ॥ यस्मिन्कृष्णो दिवं यातस्तस्मिन्नेव तदाहनि प्रतिपन्नं कलियुगमिति प्राहुः पुराविदः ३३ ॥ दिव्याब्दानां सहस्रां
ते चतुर्थे तु पुनः कृतं । भविष्यति यदा नृणां मन आत्मप्रकाशकं ३४ ॥ इत्येष मानवो वंशो यथा संख्यायते भुवि । तथा विट्शूद्र
विप्राणां तास्ता ज्ञेया युगे युगे ३५ ॥

न मानेन सहस्राब्दपरिमिते चतुर्थे युगे अतिक्रांते सतीत्यर्थः ॥ द्वादशाब्दशतात्मक इति संधिसंध्यांशकल्पयोरत्र तु तोविनामध्यकाले परिमाणमुक्तं इत्यतो न
विरोधः कृतयुगारंभकालमुपलक्षणेनाह यदा नृणां मन आत्मप्रकाशकमित्यात्मस्वरूपगोचरं मनो भविष्यति तदा कृतयुगं भविष्यतीत्यर्थः ३४ ॥ तत्र प्र
जाः कीदृश्यः इत्यपेक्षायामाह इत्येष इति ॥ इत्थंभूत एष मानवः वैवस्वतमनुवंशः यथा संख्यायते येषां मिश्रजनीनां वस्याभिः सम्यक् ख्यायते कथ्यते त
था विट्शूद्रविप्राणां तास्ता ज्ञेयाः युगे युगे बोध्या इत्यर्थः ३५ ॥ किं बहुना तावंशानुकीर्तनेनेति तत्र स्वशंकां वारयति ॥ एतेषामिति ॥

मज्जन्मप्रभृति यावत्सोमवंशसमाप्तिः कियान्कालो भविष्यतीत्यभिप्रायमालक्ष्याह ॥ आरभ्येति नंदाभिषेचनपर्यंतमेव सोमवंशस्यानुवृत्तिरतो या
वन्नंदाभिषेचनं इत्युक्तं ॥ एतदंतरवर्षाणां पंचदशोत्तरं शतं सहस्रं चेत्यर्थः ॥ वर्षसहस्रं पंचदशोत्तरं शतं चेति कयापि विवक्षयावांतरसंख्येयं ॥ वस्तुतः
परीक्षिन्नंदयोरंतरं शान्यांन्यूनवर्षाणां सार्द्धसहस्रं भवति यतः परीक्षित्समकालं मार्जारिमारभ्य रिपुंजयांता विंशतिराजानः सहस्रसंवत्सरं भो
क्ष्यंतीत्युक्तं नवमस्कंधे ये बार्हद्रथभूपाला भाव्याः साहस्रवत्सरं इति ॥ ततः परं च प्रद्योतनाद्याः अष्टत्रिंशोत्तरशतं शिशुनागाश्च षष्ठ्युत्तरशतत्रयं भोक्ष्यं
ति पृथिवीमित्यत्रैवोक्तत्वात् ॥२६॥ कदा तर्हि कलियुगारंभ इत्यभिप्रायमालक्ष्य तद्वृद्धिकालं चाविवक्षुस्तावदारंभकालमुपलक्षयन्नाह सप्तर्षीणां
इति द्वाभ्यां अयमर्थः ॥ प्रागग्रशकटाकारं ताराससकं सप्तर्षिमंडलं तत्र किंचिदुन्नतस्तेषामग्रएवानीयो मरीचिस्ततः पश्चाद्दानमद्भुतकेधराकारो

आरभ्य भवतो जन्म यावन्नंदाभिषेचनं ॥ एतद्वर्षसहस्रं तु शतं पंचदशोत्तरं ॥२६॥ सप्तर्षीणां तु यौ पूर्वौ दृश्येते उदितौ दिवि एतद्वर्षसह
स्रं तु शतं पंचदशोत्तरं ॥२७॥ तेनैव ऋषयो युक्तास्तिष्ठंत्यब्दशतं नृणां ॥ ते त्वदीये द्विजाः केचिदधुना चाश्रिता मघां ॥२८॥ विष्णोर्भगव
द्भानुः कृष्णाख्योऽसौ दिवं गतः तदाऽविशत्कलिर्लोकं पापे यद्रमते जनः ॥२९॥

वसिष्ठः समार्यस्ततः पश्चादीषदुन्नतोंऽगिराः ततः ॥ पश्चाच्चतुरस्रतारा चतुष्कं ईशानेत्रिः ततो दक्षिणतः पुलस्त्यः पुलस्त्यात्पश्चिमतः
पुलहः ततउत्तरतः क्रतुः ॥ एवं स्थिते तेषां मध्ये पूर्वौ उदयसमये प्रथममुदितौ पुलहक्रतुसंज्ञौ ॥ तयोस्तु मध्ये तयोः पूर्वयोस्तु मध्ये यत्समं दक्षिणतः
समदेशावस्थितमश्विन्यादिषु यदन्यतमं नक्षत्रं दृश्यते ॥ तेनैव युक्ता ऋषयः नृणामब्दशतं तिष्ठंति ते च द्विजा ऋषयः त्वदीये कालेऽधुना मघामा
श्रित्य वर्तंते पूर्वयोर्मघानां च साम्यावस्थित्युपक्रमकालः कलियुगारंभकाल इति सूचितं तदग्रे स्पष्टमेव वक्ष्यति ॥२८॥ कदा तर्हि युगाभिमानी यु
गप्रवेश इत्यपेक्षायामुपलक्षणांतरमाह ॥ विष्णोरिति ॥ भानुः भातीति प्रकाशात्मकः कृष्णाख्यो भगवतो देहः ॥ यदा दिवं वैकुंठं गतः तदा कलिरिमं वि
लोकमविशत् ॥ अथ यस्माद्युगाभिमानिपुरुषाद्धेतोर्जनः पापे रमते ॥ युगसंधौ हि भगवदवतारः अतः प्रवृत्तेऽपि कलौ युगे भगवतः स्वधामानुगमनात्पू
र्वं कलियुगस्योद्भवभूदेवेत्यनेन सूच्यते ॥२९॥

भ०द्वा०टी०
७

ममतोक्ता लोकेषुक्त ममताप्रकारं प्रपंचयति ॥ कथमिति सेयमखंडा भूमिर्मत्पूर्वजैर्धृतासीत् मदनंतरं मत्पुत्रोऽहमेव वा पौत्रो धर्ता यस्यास्तथाभूतास
ीमत्पुत्रादेः कथं स्यादित्येवं ॥ ४२ ॥ किं च तेजइति ॥ अबुधाः देहातिरिक्तात्मज्ञानविधुराः अत एव तेजोऽबन्नपरिणामरूपं कायं शरीरमात्मत
या गृहीत्वाऽस्मिन्नात्मगृहीतु ममतया गृहीत्वा त लोका यमहीं हित्वांऽते प्रारब्धांतेऽदर्शनं लयं गताः प्राप्ताः ॥ ४३ ॥ कथामात्रावशिष्टानां इत्य स्य
प्रपंचमुपसंहरति येइति ॥ हे राजन् ये ये राजानो भुवमोजसा पौरुषेण भुवं भुंजंति ते सर्वे कालेन कृताः सन्ताः ॥ कथासु क्रियमाणासु कथामात्र
रूपाः कृताश्च ॥ ४४ ॥ इति द्वादशे द्वितीयः ॥ २ ॥ प्रपंचितां ममतां महीहासेन संवादयन्वैराग्यमुत्पादयन्कलिदोषान्प्रपंचयंश्च तन्निरसनोपाय

कथं सेयमखंडा भूः पूर्वैर्मे पुरुषैर्धृता ॥ मत्पुत्रस्य च पौत्रस्य मत्पूर्वा वंशजस्य च ॥ ४२ ॥ तेजोऽबन्नमयं कायं गृहीत्वात्मतयाबुधः ॥ महीं
ममतया चोभौ हित्वांते ऽदर्शनं गताः ॥ ४३ ॥ ये ये भूपतयो राजन् भुंजंति भुवमोजसा ॥ कालेन ते कृताः सर्वे कथामात्राः कथासु च ॥ ४४ ॥
इति श्रीमद्भागवते महापुराणे द्वादशस्कंधे कलिधर्मवर्णनं नाम द्वितीयोऽध्यायः ॥ २ ॥ श्रीशुक उ० ॥ ॥ दृष्ट्वात्मविजये व्यग्रान्नृपान्
हसति भूरियं ॥ अहो मा विजिगीषंति मृत्योः क्रीडनका नृपाः ॥ १ ॥ काम एष नरेंद्राणां मोघः स्याद्विदुषामपि येन फेनोपमे पिंडे येऽति विश्रं
भिता नृपाः

नुपदिशति तृतीयेन ॥ दृष्ट्वात्मविजय इत्यादिना ॥ आत्मनि भूमौ निमित्ते यो विजयः ॥ तस्मिन्व्यग्रानुद्युक्तान् दृष्ट्वा इयं भूः हसति हासमेव प्रपंचयति
अहो इत्यादिभिः सार्द्धैर्द्वादशभिः ॥ मृत्योः क्रीडनकास्तदधीनाः ॥ इमे नृपा मां विजिगीषंति विजयेन मां भोक्तुमिच्छंतीत्यर्थः ॥ १ ॥ कौ इति ॥ विदुषामपि
दिग्विजयादि दृष्टं तेन मृत्युवश्यतां परवशतामपि अयं कामः विजिगीषात्मके च्छाविशेषः मोघः व्यर्थः । मोघत्वे हेतुः तया कामं विशिनष्टि ॥ येन कामेन
फेनोपमे जलबुद्बुदतुल्ये पिंडे शरीरे ये नृपाः ॥ अतीव विश्रंभिताः विश्वासं नीताः ॥ तेषां नरेंद्राणामिति पूर्वेणान्वयः ॥ २ ॥ विजिगीषुतां प्रपंच
यति सार्द्धद्वाभ्यां ॥

म
राम
७

नामलिंगग्राहीमलवधीयार्थीशाप्रजंतः एवंविधनामरूपवतांइत्यर्थः महात्मनांइत्यनेनतत्रकेषांचिद्भगवतत्वंततएवतच्चरित्रस्यावश्यश्रोतव्यत्वा
दिकंसूच्यते कथामात्रेणैवावशिष्टानांनतुनामरूपाभ्यामनेनतयोरनित्यत्वंसूच्यते तेनचतात्पर्यालोचनतयावैराग्यहेतुत्वंफलितंकीर्तिरेव॥
स्थिताभुवीत्यनेनावश्यंराजभिःकीर्तिमर्जनीयमितिव्यज्यते ३६ ननुकलावुसस्वराजवंशतत्कर्माणांकुतः पुनःकृतेप्रवृत्तिरित्यभिप्रा
यमालक्ष्याह देवापिरिति शंतनोर्भ्राता देवापिर्नामसोमवंश्यः मरुर्नामेक्ष्वाकुवंशजःसूर्यवंश्यइत्यर्थः तावुभावधुनाकलापग्रामेआसातेक
लापग्रामोबदर्याश्रमस्थोयोगिनामालयस्तत्रवुरीक्षिवासाःप्रसिद्धः कथंभूतौमहतायोगबलेनान्वितौ ३७ ततःकिमतआहताविति कलेरं
तःकृतयुगादिः तदाभगवत्प्रकटयिष्यतः तौउपदिष्टवर्णाश्रमधर्मौआदिष्टौचेहलोकेएत्यागत्यवर्णाश्रमधर्मंपूर्ववत्प्रथयिष्यतः ३८ प्रतिचतु

एतेषांनामलिंगानांपुरुषाणांमहात्मनां कथामात्रावशिष्टानांकीर्त्तिरेवस्थिताभुवि ३६ देवापिःशंतनोर्भ्रातामरुश्चेक्ष्वाकुवंश
जः कलापग्रामआसातेमहायोगबलान्वितौ ३७ ताविहैत्यकलेरंतेवासुदेवानुशिक्षितौ वर्णाश्रमयुतंधर्मंपूर्ववत्प्रथयिष्यतः ३८
कृतंत्रेताद्वापरंचकलिश्चेतिचतुर्युगं अनेनक्रमयोगेनभुविप्राणिषुवर्त्तते ३९ राजन्नेतेमयाप्रोक्तानरदेवास्तथापरे भूमौममत्वंकृत्वांतेहि
त्वेमांनिधनंगताः ४० कृमिविड्भस्मसंज्ञांतेराजनाम्नोपियस्यच भूतध्रुक्तत्कृतेस्वार्थंकिंवेदनिरयोयतः ४१

र्युगरीतिःकीदृशीत्यभिप्रायमालक्ष्याहकृतमिति अनेनक्रमयोगेननिरूपितचतुर्युगक्रमयोगरीत्यैवप्रतिचतुर्युगंप्राणिषुवर्त्ततेनिमित्ततयाप्रवर्त्त
तइत्यर्थः इयमेवरीतिःप्रतिचतुर्युगमितिभावः यद्यप्यत्रत्रेताद्वापरयोःप्रकारोनोक्तइत्यनेनक्रमयोगेनेत्यसंगतंतथाप्याद्यंतयुगरीतिनिरूपणेमध्य
योरपियुगयोर्निरूपितप्रायमेवेत्यभिप्रायेणोक्तं ३९ कथामात्रावशिष्टानांइत्यनेनसूचितंविवृणोति राजन्निति हेराजन्नेतेमयाधुनानिरूपितावेव
स्वतमन्वेतरावस्याश्चराजानस्तावद्भूमौममत्वंममताबुद्धिंकृत्वांतेतत्तद्भोगनिमित्तपुण्यावसानेनिधनंनाशंगताः तेनैवममत्वेनचताभिरयंप्राप्ता
इतिभावः ४० एतदेवविशदयतिकृमीति यस्यराजनाम्नोपिशरीरस्यतेकृमयोविष्ठाभस्मेतिवासंज्ञाभविष्यतितत्कृतेतदर्थंभूतेभ्योद्रुह्य
तीतियासःकिंस्वार्थंस्वहितंवेद तत्रहेतुत्वेनभूतद्रोहंविशिनष्टियतोभूतद्रोहान्निरयोभवति ४१

भा०द्वा०टी०
८

इतरे राजिष्ठाः के पुनस्तेन्ट्र पा इत्यतस्तान् कांश्चिद्दर्शयति। पृथुरिति। अर्जुनः कार्त्तवीर्यः रामो नाम कश्चिद्राजा न तु दाशरथिः धुंधुहा धुंधुमारः ९।१०
लोकं रावयति मारयतीति लोकरावणो रावणः भौमो नरकः ११ उक्तेभ्योऽन्ये दैत्या राजानश्च महीश्वराः पृथ्वीपतयः ते सर्वे यद्यपि सर्वतः इतरैर
जिताश्च १२ मय्यपुत्रे अधिकां ममतां कृत्वा अवर्तंत कंचित्कालं इति शेषः मर्त्यधर्मिण इति हेतुगर्भं अतः कालेनाकृतार्थाः असमापितमनोरथाः शि
षाः कृताः स्थिता इति संबोधनं कुरूद्वहेति वा ख्येयं १३ एवं वंशानुकीर्तनस्य तात्पर्यमाह कथा इति। लोकेषु यशो वितायं विस्तार्य परेयुषां परलो
कं प्राप्तानां महीयसां महात्मपुरुषाणां इमाः कथास्तेभ्यं कथिताः। विज्ञानवैराग्यविवक्षया विज्ञानं विषयाणामसारत्वज्ञानं ततो वैराग्यं
तयोर्विवक्षया कथिता इति संबंधः। तत्र हेतुत्वेन कथा विशिनष्टि वचोविभूतीः व्यत्ययेन प्रथमार्थे द्वितीया। वाग्वैभवविषयाः अनेन

पृथुः पुरूरवा गाधिर्नहुषो भरतोऽर्जुनः। मांधाता सगरो रामः खट्वांगो धुंधुहा रघुः ९ तृणबिंदुर्ययातिश्च शर्यातिः शंतनुर्गयः। भगीरथः कुव
लयाश्वः ककुत्स्थो नैषधो नृगः॥१०॥ हिरण्यकशिपुर्वृत्रो रावणो लोकरावणः। नमुचिः शंबरो भौमो हिरण्याक्षोऽथ तारकः॥११॥ अन्ये च बहवो
दैत्या राजानो ये महीश्वराः॥ सर्वे सर्वविदः शूराः सर्वे सर्वजितोऽजिताः॥ ममतां मय्यवर्त्तंत कृत्वोच्चैर्मर्त्यधर्मिणः। कथावशेषाः कालेनह्यकृ
ताविभो॥१३॥ कथा इमास्ते कथिता महीयसां वितायलोकेषु यशः परेयुषां॥ विज्ञानवैराग्यविवक्षया विभो वचोविभूतीर्न तु पारमार्थ्यं॥१४॥
यस्तूत्तमश्लोकगुणानुवादः॥ संगीयतेऽभीक्ष्णममंगलघ्नः तमेव नित्यं शृणुयादभीक्ष्णं कृष्णेऽमलां भक्तिमभीप्समानः॥१५॥

विशेषतोऽन्यन्निप्रेतं विवादयति न तु पारमार्थ्यमिति। परमोऽर्थः पुरुषार्थः तस्य भावः पारमार्थ्यं तत्त्वं तु न हीत्यर्थः। न ह्येभिर्नृकेषु पारमार्थ्यमिति भावः १४ कं
तर्हि परमार्थोपाय इत्यत आह यस्त्विति। संगीयत इत्यस्य सक्थिरित्यादि। उत्तमश्लोकस्य भगवतो गुणानामनुवादः। स च अमंगलं संसारस्य पापादिकम् अशुभं
कर्म हन्तीति घातमेवमन्वहं तत्राप्यभीक्ष्णं शृणुयात् श्रवणप्रयोजनं दर्शयन्नधिकारिणं विशिनष्टि। कृष्णेऽमलां भक्तिमभीप्समानः अमला मत्सरपत्रयो
जना भक्तिमभीप्समानः कामानः श्रवणपरंपरया भगवति दृढा भक्तिर्भविष्यतीति भावः १५ श्रीरामकृष्णायनमः॥

राम०
८

पूर्वमिति। इंद्रियलंपटस्य न राज्यप्राप्तिः स्यादिति तावत्स्वइंद्रियवर्गं जित्वा तद्द्वारा देवताप्रसादमधिगम्येति भावः। क्रमेण राजमंत्रिप्रभृतीन्
स्वमंडलस्य कंटकतुल्यान् जेष्यामः। तत्र सचिवश्रेष्ठा अमात्या अवांतरव्यापारिणः पौराः पुरे भवास्तेषां मा मा। करींद्रा हस्तिपाः प्रभृता नु ततः सागरमे
खलायस्यास्तां मेखलयेव सागरेण परिवृता इत्यर्थः। पृथ्वीं जेष्यामः। स्वाधीनां करिष्याम इतीत्यभूताश यावद्देहद्वयं येषां तेऽतिके समीपवर्तमा
नमंतकं लस्तुं न पश्यंति नावलोकयंति ४। किंतु सहुडावरणं मां जित्वा ततोऽब्धिं विश्रांतिद्वीपांतराणि प्रविशंति तान्विजिगीषंतीत्यर्थः। तावत्क
तस्येंद्रियजयस्येदं फलमित्याह कियदिति। एतत्करतलभूमंडलस्य सप्तद्वीपस्य स्वाधीनताप्रापणमित्येतत्कियत्फलं न किंपि दैतदित्यर्थः। तत्फल

पूर्वं निर्जित्य स्ववर्गं जेष्यामो राजमंत्रिणः। ततः सचिवपौरांश्च करींद्रानथ कंटकान्। ३। एवं क्रमेण जेष्यामः पृथ्वीं सागरमेखलां
इत्याशाबद्धहृदया न पश्यंत्यंतिकेऽंतकं ४। सगुडावरणं जित्वा मां विशंत्यब्धिमोजसा। कियदात्मजयस्यैतन्मुक्तिरात्मजये फलं
५। यां विसृज्यैव मनवस्तत्सुताश्च कुरूद्वह। गता यथागतं युद्धे तां मां जेष्यंत्यबुद्धयः ६। मत्कृते पितृपुत्राणां भ्रातॄणां वापि विग्रहः
जायंते सुसतां राज्ये ममताबद्धचेतसां ७। ममैवेयं मही कृत्स्ना न ते मूढेतिवादिनः। स्पर्द्धमाना मिथो घ्नंति म्रियंते मत्कृते नृपाः ८।

स्य नश्वरत्वादिति भावः। किं तर्हि फलमित्यत आह मुक्तिरात्मजये फलमिति ५। एतदेवोपपादयति यामिति। कुरूद्वहेति संबोधनेन भिमीतिं कथयंस्
मुकाः संबोधयति कुलोद्वहेत्यपि पाठः। सुताः मनवस्तत्सुता मनुपुत्राश्च यां मां विसृज्यैव गता मृता। तथा तां विजित्य विसृष्टामप्यबुद्धयो बुद्धिरहिता
युद्धे जेष्यंति युद्धेन स्ववशीकरिष्यंतीत्यर्थः। गतमित्यस्य तेरिति शेषः। तथैव गमिष्यंतीत्यर्थः। अत्यंतसाहसेन नेह सारोऽप्यगतमिति सूचितमिति हैराः ६। स्वंतु
दितां प्रपंचयति मत्कृते इति। मत्कृते रमस्पर्धो विग्रहः विरोधः जायते। तत्र हेतुत्वेन तान्विशिनष्टि राज्ये ममताभिमानेन बद्धं चेतो येषां तेषां मत एवासतांऽ
राज्ञानां ७। ममताबद्धचेतस्त्वमेवाभिनयेन दर्शयन्नुक्तमसत्कर्म दर्शयति ममैवेति। हे मूढ ते तवेयं भूमिर्न भवति किंतु ममैवेति वादान्कुर्वंतः
मिथः घ्नंति ८।

द्वापरेयुगेऽधर्मस्य लक्षणैश्चिह्नैः पादैरिति यावत् हिंसादिभिश्चतुर्भिर्धर्मस्यापादैरर्द्धं ह्रसति ॥ हिंसातुष्ट्यनृतद्वेषैरिति क्रमो न विवक्षितः ॥ अनृतेन स
त्यं हिंसया दयाऽसंतोषेण तपः विग्रहेण दानं इति यथायोग्यं ॥ २२ ॥ नादालिकजनानाह यशस्विन इति ॥ महाशीला महायज्ञानुष्ठातैर्न सत्यं हिंसया दया
ढ्यस्तेषां ॥ तस्माः क्षत्रियब्राह्मणप्रधानाः ॥ २३ ॥ कलाविति ॥ एवमग्रेप्युक्तमवगंतव्यं ॥ धर्महेतूनां धर्मपादानां तुर्यांशः कलावशिष्यते सोऽप्येधमानैर्वर्द्ध
मानैरधर्मस्य हेतुभिः पादैरहरहः ॥ क्षीयमाणोंते सोऽपि विनंक्ष्यति २४ ॥ जनानाह तस्मिन्निति शुष्कवैरिणः निर्हेतुकवैरिणः ॥ दुर्भगा भाग्यहीनाः ॥ भूरि
तर्षाऽधिकामसदृक्षायेषांते शूद्रदासोत्तराजनाः शूद्राः दासाः कैवर्तादयश्च ते उत्तराः ॥ प्रधाना येषां ते प्रजा इत्यपि पाठ यद्वा शुष्कवैरिण इति लिंगव्यत्य

तपःसत्यंदयादानेष्वर्द्धं ह्रसति द्वापरे हिंसाऽतुष्ट्यनृतद्वेषैर्धर्मस्याधर्मलक्षणैः ॥ २२ ॥ यशस्विनो महाशीलाः स्वाध्यायाध्ययने रताः ॥ आढ्या
कुटुंबिनो हृष्टा वर्णाः क्षत्रद्विजोत्तमाः ॥ २३ ॥ कलौ तु धर्महेतूनां तुर्यांशोऽधर्महेतुभिः ॥ एधमानैः क्षीयमाणो ह्यंते सोऽपि विनंक्ष्यति २४ त
स्मिन्लुब्धा दुराचारा निर्दयाः शुष्कवैरिणः ॥ दुर्भगा भूरितर्षाश्च शूद्रदासोत्तराजनाः ॥ २५ ॥ सत्वंरजस्तम इति दृश्यंते पुरुषे गुणाः क
लसंचोदितास्ते वै परिवर्तंत आत्मनि २६ प्रभवंति यदा सत्वे मनोबुद्धीन्द्रियाणि च तदा कृतयुगं विद्याज्ज्ञाने तपसि यद्रुचिः २७

यत्यार्थः ॥ २५ ॥ किं तर्हि युगेष्वेवंविधवैषम्यकारणमित्यपेक्षायं कलौ कृतयुगं स कलिस्तस्य कृते युगे यस्य चेतसि गोविंदो हृदि यस्य न केशवः इत्युक्त
रीत्या कालात् गुणाः सत्वादिगुणोत्कर्षः सदा सत्वगुणककार्यवैविध्यमेवेत्याह सत्वमिति पंचभिः दृश्यन्तां तावत् ततः किमत आह कालसंचोदिता इति तेस
त्वाद्यो गुणाः ॥ कालेन संचोदितास्त्वात्मनि परिवर्तंते ह्रासाध्यासभ्यां मनसि स्वस्वकार्यकराः प्रवर्तंत इत्यर्थः ॥ २६ ॥ तत्र मनश्च तद्दृश्यानि बुद्धीन्द्रिया
णि यदा सत्वे प्रभवंत्यतिशयेन वर्तंते उद्रिक्तसत्वप्रधाना भवंतीत्यर्थः ॥ तदा कृतयुगं विद्याज्जानीयात् कुतो यद्यतः सत्वोत्कर्षकार्ये ज्ञाने तपसि का
र्ती युगधर्मरुचिः कार्यविशेषेणैव कालविशेषानुमानमिति भावः ॥ २७ ॥

तदानंदांशस्यास्त्येव कलिर्वृद्धिं गमिष्यतीत्युक्तं तत्रावसरप्राप्तं निरूपणानंतरं के पुनस्ते कलिवृद्धिप्रयुक्तदोषाः कश्च तन्निस्तरणोपायः के पुनस्त
द्युगसाधारणगुणाः यावदेनं तच्चतुर्युगप्रवृत्तिमतः कथं वा प्रलयः च कतिविधः इति पृच्छति राजा केनेति द्वाभ्यां हे भगवन्कलौ युगे ऽपचिता
न्कलेर्दोषान्केनोपायेन साधनेन विधमिष्यंति नाशयिष्यंति तत्साधनं यथावन्मे मह्यं ब्रूहि १६ प्रलयस्य मानं वैविध्यं मानं विशिनष्टि का
लस्येति ईश्वरस्वरूपं शरीरं तस्य कालस्य गतिं प्रवृत्तिं ब्रूहीति संबंधः महात्मन इति सामर्थ्यादीश्वरविशेषणं १७ तत्र तावद्युगधर्मानाह कृ
त इत्यादि नायन्नामधेयं इत्यतः प्राक्तनेन ॥ चत्वारः पादा यस्य स चतुष्पाद्धर्मः तज्जनैः कृतयुगजनैः धृतः प्रवर्तते के पुनस्ते पादा इत्यत आ

राजोवाच ॥ केनोपायेन भगवन्कलेर्दोषान्कलौ जनाः ॥ विधमिष्यंत्युपचितांस्तन्मे ब्रूहि यथा मुने १६ युगानि युगमानं च धर्मं प्रलयक
ल्पयोः कालस्येश्वररूपस्य गतिं विष्णोर्महात्मनः ॥ १७ ॥ श्रीशुक उ० ॥ कृते प्रवर्तते धर्मश्चतुष्पात्तज्जनैर्धृतः ॥ सत्यं दयातपो दान
मिति पादा विभोर्नृप ॥ १८ ॥ संतुष्टाः करुणा मैत्राः शांता दांतास्तितिक्षवः ॥ आत्मारामाः समदृशः प्रायशः श्रमणा जनाः १९ त्रेतायां धर्म
पादानां तुर्यांशो हीयते शनैः ॥ अधर्मपादैरनृतहिंसासंतोषविग्रहैः ॥ २० ॥ तदा क्रियातपोनिष्ठा नातिहिंस्रा न लंपटाः ॥ त्रैवर्गिकास्त्रयीवृद्धा
वर्णा ब्रह्मोत्तरा नृप ॥ २१ ॥

ह सत्यमिति हे नृप विभोः पूर्णस्य धर्मस्य ॥ १८ ॥ कार्त्तयुगान्जनान्वर्णयति संतुष्टा इति अस्य दैवाद्यन्नबोधेनेत्यादि करुणाः परदुःखनिराचिकीर्षवः भूत
मैत्रीयुक्ताः तितिक्षवः द्वंद्वसहिष्णवः समदृशः जातिगुणादितारतम्यानादरेण सर्वस्य भगवदात्मकत्वदर्शिनः श्रमणाः तप० स्वर्यादि प्रवृत्तका
यक्लेशायुक्ताः ननु सर्वेऽप्येवंविधाश्चेन्मुक्ता एव स्युरिति नित्ययुगांतरप्रवृत्तिरित्याशंकाव्यावृत्तये प्रायश इत्युक्तं एवंविधा इत्यर्थः १९ त्रेतायामिति अधर्मस्य
पादैरनृतादिभिर्धर्मस्य पादानां तुर्यांशः शनैर्हीयते अतिपादं चतुर्थांशः क्षीयते असंतोषेति छेदः विग्रहः कलहविरोधः क्रमेणैतैः सत्यादीनां तुरीयां
शो हीयत इत्यर्थः २० तात्कालिकान्जनानाह तदेति न लंपटाः नातीव विषयलोलुपाः ब्रह्मोत्तराः ब्राह्मणाधिकाः त्रयीवृद्धाः वैदिककर्मवृद्धाः २१

किराताः वणिजः संहृत्य व्यापारिणः पणयिष्यंति क्रयविक्रयादिव्यापारं प्रवर्त्तयिष्यंति शूद्राः सति व्यत्यासे हेतुश्चेष्टा भवति किंचानापद्यपि जुगुप्सितां निंदितां वृत्तिं साधु मन्यंते ॥ ३५ ॥ अखिलोत्तमं सर्वोत्तमम् पतिं स्वामिनं भृत्यास्त्यक्ष्यंति तथा पतयोपि नष्टं विपन्नं रोगादिभिर्जीर्णं दासं त्यक्ष्यंति कौलं कुलपरंपरागतं महाभागवतं च धर्मं गामश्चापयस्विनीः दुग्धदोहाः त्यक्ष्यंतीति संबंधः ॥ ३६ ॥ पितृभ्रातृसुहृज्ज्ञातीन् हित्वा सौरतं सुरतनिमित्तं सौहृदं येषां ते तत एव ननांदृश्यालाभार्याभगिन्यः श्वालाभार्याभ्रातरश्च तैः संवादो मंत्रालोचनं येषां ते अतः स्त्रैणाः स्त्रीवश्याः ॥ ३७ ॥ शूद्राः तपोवेषेणोपजीवंतीति तथा प्रतिग्रहीष्यंति तथा स्वयमधर्मज्ञा अप्युत्तमासनमधिरुह्य धर्ममेव वक्ष्यंत्युपदेक्ष्यंतीत्यर्थः ॥ अथावांतरावस्थ इत्यनेनानामिणां कलिकृतं दोषं कीर्तनं सिंहावलो

कयिष्यंति वै शूद्राः किराताः कूटकारिणः ॥ अनापद्यपि मंस्यंते वार्त्तां साधुजुगुप्सितां ॥ ३५ ॥ पतिं त्यक्ष्यंति निर्द्रव्यं भृत्या अप्यखिलोत्तमं ॥ भृत्यं विपन्नं पतयः कौलं गाश्चापयस्विनीः ॥ ३६ ॥ पितृभ्रातृसुहृज्ज्ञातीन् हित्वा सौरतसौहृदाः ॥ ननांदृश्यालसंवादा दीनाः स्त्रैणाः कलौ नराः ॥ ३७ ॥ शूद्राः प्रतिग्रहीष्यंति तपोवेषोपजीविनः ॥ धर्मं वक्ष्यंत्यधर्मज्ञा अधिरुह्योत्तमासनं ॥ ३८ ॥ नित्यमुद्विग्नमनसो दुर्भिक्षकरकर्शिताः ॥ निरन्ने भूतले राजन्ननावृष्टिभयातुराः ॥ ३९ ॥ वासोन्नपानशयनव्यवायस्नानभूषणैः हीनाः पिशाचसंदर्शा भविष्यंति कलौ प्रजाः ॥ ४० ॥ कलौ काकिणिकेप्यर्थे विगृह्य त्यक्तसौहृदाः ॥ त्यक्ष्यंति च प्रियान् प्राणान् हनिष्यंति स्वकानपि ॥ ४१ ॥ ॥

तदोषकीर्तनं सिंहावलोकनन्यायेन हस्वकायाइति तत्कृतस्तद्दोषकथनं तत एकेन तत्कृतवर्णाश्रमदोषकीर्तनं ततो वर्णाश्रमचातुर्वर्ण्यं तद्दोषकथनं तत एके न श्लोकेन तद्दोषकीर्तनमिति विभाग ॥ ३५ ॥ अथ चातुर्वर्ण्यसाधारणं तत्कृतदोषमाह नित्यमिति षड्भिः उद्विग्नमनसः अंचलमानसाः भीतमानसा न दुर्भिक्षं करैश्च राजभागेन चकर्शिताः पीडिताः अनावृष्टिभयेनाप्यातुराः दुःखिताः ॥ ३९ ॥ वास इति व्यवायो मैथुनं वासमे वा निरन्ने अन्नरहिते दुर्भिक्षेण करेण स्वामिग्राह्यभागेन च कर्शिताः पीडिताः अनावृष्टिभयेनाप्यातुराः दुःखिता ॥ ४० ॥ वास इति व्यवायो मैथुनं दिभिर्हीनाः पिशाचसंदर्शाः पिशाचसदृशाः ॥ ४० ॥ कलाविति काकिणिके वराटिकामात्रेप्यर्थे विषये विगृह्य विरोधं कृत्वा त्यक्तं सौहृदं येषां ते ॥ ४१ ॥

सचोत्त१

यदा कर्मस्विति भक्तिरभिरुचि: तदा रजोवृत्तिप्रधानं त्रेतायुगमिति जानीहि बुद्धिमन्निति संबोधनं ॥२७॥ यदालोभ इति मानो गर्व: स चोत्तमेष्ववमतिहेतुश्चि
त्तविकार: कर्मणामिति विषयविषयिभावसंबंधे षष्ठी ॥ अनुषक्तेन भक्तिपदेन संबंध: काम्यकर्मस्वभिरुचिरित्यर्थ: ॥ तत्तदा रजस्तमोवृत्तिप्रधानं द्वाप
रं युगं जानीहि इति पूर्वेण संबंध ॥२८॥ यदेति माया कापट्यं विषादनमांतरं दु:खं शोको बाह्यमश्रुविमोचनादिरूपं दैन्यं कार्पण्यं तदा तामस: केवल
तमोगुणवृत्तिप्रधान: कलि: स्मृत: ॥२९॥ अथ कलिविशिष्टं लक्षयंश्चान्वयं चयति यस्मादित्यादिना यस्मान्मर्त्या: वक्ष्यमाणविधा: स कलिरिति
पूर्वेण संबंध: क्षुद्रदृश: मंदमतय: क्षुद्रभाग्या अल्पभाग्या: असतीरसत्य: दु:शीला कर्कशा चंडी नित्यं कलहकारिणी स्तु रूक्षविधा ॥३०॥ जनपदा देशा वा

यदा कर्मसु काम्येषु भक्तिर्नेव तिदेहिन ॥ तदा त्रेता रजोवृत्तिरिति जानीहि बुद्धिमन ॥२७॥ यदा लोभस्त्वसंतोषो मानो दंभोऽथम
त्सर: कर्मणां चापि काम्यानां द्वापरं तद्रजस्तम: ॥२८॥ यदा मायानृतं तंद्रा निद्रा हिंसा विषादनं शोकमोहौ भयं दैन्यं स कलि
स्तामस: स्मृत: ॥२९॥ यस्मात्क्षुद्रदृशो मर्त्या: क्षुद्रभाग्या महाशना: कामिनो वित्तहीनाश्च स्वैरिण्यश्च स्त्रियोऽसती ॥३०॥ दस्यू
त्कृष्टा जनपदा वेदा: पाषंडदूषिता: राजानश्च प्रजाभक्षा: शिश्नोदरपरा द्विजा: ॥३१॥ अव्रता बटवोऽशौचा भिक्षवश्च कुटुं
बिन: तपस्विनो ग्रामवासा न्यासिनो ह्यर्थलोलुपा ॥३२॥ ह्रस्वकाया महाहारा भूर्यपत्या गतह्रिय: शश्वत्कटुकभाषिण्यश्चौर्यमायोरुसा
हसा: ॥३४॥

सिन: दस्युभिश्चोरादिभिरुत्कृष्टा उपद्रुता: प्रजा भक्षा: प्रजापीडनपरा: द्विजास्तु शिश्नोदरपोषणपरा: ॥३१॥ बटवो ब्रह्मचर्याश्रमिण: अव्रता: स्वाश्रमो-
चितव्रतहीना: अशौचा: शौचहीना: भिक्षवश्च विप्लंति कुटुंबिनो गृहस्था: भिक्षव: भिक्षाटनपरा: तपस्विनो वानप्रस्था: ग्रामो वासो येषां वासत्यस्थोऽधिक
रण्यं त्यजेत: न्यासिनस्तुर्याश्रमिणोऽर्थलोलुपा वित्ताभिलाषिण इत्यर्थ: ॥३२॥ पुनरपि स्त्रीणां लक्षणमाह ह्रस्वकाया अल्पपरिमाणदेहा भूरीण्यपत्यानि यासां
ता: गतह्रिय: त्यक्तलज्जा: कटुकभाषिण्य अप्रियवादिन्य: चौर्यं च माया कापट्यं च उरु साहसं चेति द्वंद्व: तेनाम्नायपीयो च ॥३४॥

भा०द्वा०टी०
२१

ततो हृ घ २

इतोऽन्य उपायो नास्तीत्याह विद्येति । यथा त्रिविधपरिच्छेदरहिते विष्णुपासकानुग्रहार्थं हृदि स्थिते सत्यं तथात्मा मनोऽत्यंतशुद्धिं लभेते तथा विद्यादिभिर्न लभ
ते तत्र विद्या शास्त्राध्ययनं तपोऽनशनादि स्ववर्णाश्रमधर्मो वा प्राणनिरोधः प्राणनिरोध । प्राणजयः मैत्री अहिंसाव्रतं एकादश्यादि जप्यं मंत्रजपः ४८
उपायोपदेशमुपसंहरति तस्मादिति हि यस्मादवस्थापनादेव हितचित्तो म्रियमाणाः परां गतिं याति तस्मात् त्वं हृदिस्थं केशवं कुरु इत्यर्थः ४९ इममे
वार्थं दृढीकर्तुं पुनरप्याह म्रियमाण इति । आत्मभावमात्मस्वभावं साम्यापत्तिमित्यर्थः । तद्भावभावमापन्न इत्यादिशास्त्रैकार्थ्यात् । तत्र हि प्रथम
भावशब्दः स्वभाववाची अन्यथा द्वितीयभावशब्दानन्वयात् । अंगेति संबोधनद्योतकं ब्रह्म[illegible]तीत्यत्र हेतुत्वेन तं विशिनष्टि सर्वात्मा सर्वेषा

विद्यातपःप्राणनिरोधमैत्रीतीर्थाभिषेकव्रतदानजप्यैः । नात्यंतशुद्धिं लभतेंऽतरात्मा यथा हृदिस्थे भगवत्यनंते ४८
तस्मात्सर्वात्मना राजन् हृदिस्थं कुरु केशवं । म्रियमाणो ह्यवहितस्ततो याति परां गतिं ४९ म्रियमाणैरभिध्येयो भगवा
न्परमेश्वरः । आत्मभावं नयत्यंग सर्वात्मा सर्वसंश्रयः ५० कलेर्दोषनिधे राजन्नस्ति ह्येको महान् गुणः । कीर्तनादेव कृ
ष्णस्य मुक्तबंधः परं व्रजेत् ५१ कृते यद्ध्यायतो विष्णुं त्रेतायां यजतो मखैः । द्वापरे परिचर्यायां कलौ तद्धरिकीर्तनात् ५२
इति श्रीमद्भागवते महापुराणे द्वादशस्कंधे तृतीयोऽध्यायः ॥३॥ ॥ ॥श्रीमद्रामचंद्र ॥ ॥

मात्मन्या मात्मा आत्मनो हि शरीरं निरतिशयप्रियमतस्तु तमनर्थं दूरीकरोतीति भावः । अनेन प्राप्यत्वोपयुक्त निरतिशयपुरुषार्थरूपत्वं चोक्तं । आत्मा हि निर
तिशयप्रीतिविषयं प्रापकत्वोपयुक्तं सौलभ्यमाह सर्वसंश्रय इति । आत्मत्वादेव सर्वैः संश्रीयत इति संश्रयः स्वात्मा हि स्वस्मिन्नेव सुलभ इति भावः ५० अथ पूर्वं कुशे
षाकरोऽयं कलिः सर्वथा भगवत्प्राप्तिं निरुंध्यादित्याशंक्याह कलेरिति दोषनिधेरपि कलेः कश्चिदनितरसाधारणो महान् गुणोऽस्ति को सौ भगवतः कीर्तनादेव
मुक्तबंधः निरस्तप्राप्तिप्रतिबंधकः परमपदपुरुषं व्रजेदित्येवं ५१ कृतादिषु ध्यानयागार्चनानां यत्फलं तत्सर्वं कलौ हरिकीर्तनादेव भवति कीर्तनं सर्वप्रायणं तु
कृतं इत्यवगंतव्यं ५२ इति द्वादशे तृतीयः ३

नेति स्थविरौ वृद्धौ च मातापितरौ इत्यादि व्याख्यो ध्वंघनं सुचितं । सर्वार्थेषु कुशलानपि पुत्रान्न रक्षिष्यंति पितृभ्यो विभज्य वर्तिष्यंत इति भावः ४२ म
हांतमनर्थमाह कलौ नेति द्वाभ्यां । हे राजन् त्रैलोक्यनाथेन ब्रह्मणा आनतं नमस्कृतं पादपद्मं यस्य तं अच्युतं न यक्ष्यंति नाराधयिष्यंति । तत्र हेतुः पा
षंडैर्विभिन्नमन्यथाकृतं चेतो येषां ते ४३ यन्नामधेयमिति । म्रियमाणाद्यन्यतमः पुमान् यस्य भगवतो नामधेयं गृणन् कीर्तयन् विमुक्ताः कर्मरूपा अर्गला
शृंखलेव बंधो यस्य सः । उत्तमां गतिं मुक्तिं प्राप्नोति तं भगवंतं न यक्ष्यंति । अत्रानु रोगादिपीडितः पतन्छिद्रेन पतितो विवहितः स्खलच्छिद्रेन स्ववर्णाश्रमाचारविधुरः
अत्र म्रियमाणो मरणादुत्तरमेवोत्तमां गतिमाप्नुवंति इतरे त्वाप्रयाणान्नुद्यपैति ते कीर्तनेति भावः । यद्वा आतुराद्यन्यतमोपि म्रियमाणो मरणे प्राप्नोतीति संबंधः
४४ तदेवं कलिदोषांश्च प्रपंच्य तन्निरासोपायमाह पुंसामिति षड्भिः । द्रव्यदेशात्मभिः संभवो येषां तान् । तत्र द्रव्यदेशौ निषिद्धौ । आत्मा विषयव्रणं मनः चित्त

नरक्षिष्यंति मनुजाः स्थविरौ पितरावपि । पुत्रान्भार्यां च कुलजां क्षुद्राः शिश्नोदरंभराः ४२ कलौ न राजन् जगतां परं गुरुं त्रैलोक्यनाथानतपादपंक
जं प्रायेण मर्त्या भगवंतमच्युतं यक्ष्यंति नैते कलौ जनाः पाषंडविभिन्नचेतसः ४३ यन्नामधेयं म्रियमाण आतुरः पतन्स्खलन्वा विवशो गृणन्पुमान्
विमुक्तकर्मार्गल उत्तमां गतिं प्राप्नोति यक्ष्यंति न तं कलौ जनाः ४४ पुंसां कलिकृतान्दोषान्द्रव्यदेशात्मसंभवान् सर्वान्हरति चित्तस्थो भगवान्पु
रुषोत्तमः ४५ श्रुतः संकीर्तितो ध्यातः । पूजितश्चादृतोपि वा । नृणां धुनोति भगवान्हृत्स्थो जन्मायुताशुभं ४६ यथा हेम्नि स्थितो वह्निर्दुर्वर्णं हंति धा
तुजं । एवमात्मगतो विष्णुर्योगिनामशुभाशयं ४७ ॥

स्थः ध्यानेन चित्ते स्थिरीकृतः हरतीति रूपयति ४५ कथं चित्तस्थो भवतीत्यत आह श्रुत इति । श्रवणादिविषयः सन् हृत्स्थो भवति । ततो जन्मायुतस्यापि
अशुभं जन्मायुतार्जितमपि पापमित्यर्थः धुनोति नाशयति ४६ तदेव दृष्टांतेनोपपादयति यथेति । धातुजं ताम्रादिः तत्संश्लेषजातं हेम्नो दुर्वर्णं तत्र स्थि
तो वह्निर्हरतीति । एवं योगिनामात्मस्थितो मनसि स्थितो विष्णुरशुभाशयं हंति । आशयो मनस्तत्स्थं मालिन्यं हंतीत्यर्थः ४७ ॥

ाव्दैनंदिनकल्पः नैमित्तिकः प्रलयश्च निरूपितः अथ महाकल्पं प्राकृतप्रलयं च निरूपयति द्विपरार्द्ध इति ॥ द्विपरार्द्ध इत्यनेनायमेव महाकल्प इति सू-
चितं सप्त प्रकृतयः महदहंकारौ भूतपंचेति अयं सप्तप्रकृतीनां लयात्मकत्वात्प्राकृतिक इति कौ लय इत्युच्यते इत्यर्थः ॥ ५ प्रकृतयः सप्त कथं लीयंते
इत्यत्र तत्प्रकारं वक्तुं प्रस्तौति पप्रलीयते इत्यादिना विघाते विनाशे निमित्ते उपसादिते उपगते सति संघातः प्रकृतिसप्तकसंघतपरिणामांडकोशः ॥ य-
त्र प्राकृतिके प्रलये लीयते ॥ ६ कोसौ विघात इत्यत आह पर्जन्य इति ॥ अवर्षतीति सप्तम्यंतं शतवर्षाणि पर्जन्यः अवर्षेति सतीत्यर्थः निरन्ने इति लिं-
गव्यत्ययश्चार्षः अन्योन्यभक्षमाणाः प्रजा एवमुपद्रुताः कालेन शनैः क्षयं यास्यंतीति संबंधः ॥ ७ सामुद्रमिति समुद्रादिषु भवं रसं जलं सांवर्त्तको

द्विपरार्द्धे त्वतिक्रांते ब्रह्मणः परमेष्ठिनः ॥ तदा प्रकृतयः सप्त कल्प्यंते प्रलयाय... ॥ ५ ॥ एष प्राकृतिको राजन्प्रलयो यत्र लीयते ॥ आं-
डकोशस्तु संघातो विघात उपसादिते ॥ ६ ॥ पर्जन्यः शतवर्षाणि भूमौ राजन्न वर्षति ॥ तदा निरन्ने ह्यन्योन्यं भक्ष्यमाणाः क्षुधार्दिताः ॥ क्ष-
यं यास्यंति शनकैः कालेनोपद्रुताः प्रजाः ॥ ७ ॥ सामुद्रं दैहिकं भौमं रसं सांवर्तको रविः ॥ रश्मिभिः पिबते घोरैः सर्वं नैव विमुंचति ॥ ८
ततः सांवर्त्तको वह्निः संकर्षणमुखोत्थितः ॥ दहत्यनिलवेगोत्थः शून्यान्भूविवरानथ ॥ ९ ॥ उपर्यधः समंताच्च शिखाभिर्वह्निसू-
र्ययोः ॥ दह्यमानं विभात्यंडं दग्धगोमयपिंडवत् ॥ १० ॥ ततः प्रचंडपवनो वर्षाणामधिकं शतं ॥ परः सांवर्त्तको वाति धूम्रं खं रजसावृतं ॥ ११ ॥

रविः प्रलयार्थमुदितः सहस्ररश्मिभिः पिबते न तु धुनेव पीतानि विमुंचतीत्यर्थः ॥ ८ तत इति ॥ अनिलवेगोत्थः वायुवेगोत्थः क्षणयाग्निः ॥ अनिलवेगो वा इति पाठे वा ऊर्ध्वं रवि-
पीतावशिष्टोदकं च दहतीत्यर्थः ॥ शेषः पाठस्तु सुगमः ॥ अनिलेन वेगो यस्येति पाठे बहुव्रीहिः ॥ ततः शून्यान् त्रिलोकान् भूविवरान्पातालादीनि च दहतीति संबंधः ॥ ९
इत्यत्र उपर्यधः समंताच्च वह्निसूर्ययोः शिखाभिर्ज्वालाभिर्दह्यमानं ब्रह्मांडं दग्धगोमयपिंडवद्विभातीति वर्त्तिष्यते ॥ १० तत इति वर्षाणामधिकं शतं किंचिदधिकं वर्षाणां श-
तमित्यर्थः प्रचंडोतिनिष्ठुरः परः बलीयान्प्रलयवायुर्वातीति रजसावृतं खमाकाशं धूम्रं भविष्यति ॥ ११ ॥

अथ यत्तच्चतुर्धा प्रलयकल्पयोर्मानं ब्रूहीति तृतीयस्कंधोक्तं कालस्वरूपानुवादपूर्वकं निरूपयितुमारभते । काल इति । ते तु मे कथित इति संबंधः । परमाण्वादिर्यस्य द्विप
रार्द्धमवधिरुत्तरावधिर्यस्य सः कालः कथितः । स कालः परमाणुर्वै यो ह्युक्तः परमाणुतां इत्यादिना कथितः । तथा चत्वारि त्रीणि द्वे चैकं कृतादिषु यथाक्रमं संख्यातानि
सहस्राणि द्विगुणानि शतानि चेति युगमानं च कथितं इत्यर्थः । इदानीं कल्पलयावपि शृणु तयोर्मानमप्युक्तमित्यर्थः ॥ १ ॥ अत्र तावत्कल्पमानमाह चतुर्युगसहस्रमिति
कल्पो द्विविधः दैनंदिनो महांश्चेति । तत्राद्यो ब्रह्मणो दिनात्मक एव कल्प इत्यभिधीयते तं विशिनष्टि । हे विशांपते यत्र कल्पे च चतुर्दश मनवः क्रमेण भवंति म
न्वंतरमानं तु स्वं कालं मनुर्भुंक्ते युगानामेकसप्ततिमिति तृतीयस्कंध एवोक्तमप्यनुसंधेयमिति ॥ २ ॥ प्रलयस्तु चतुर्विधः नैमित्तिकः प्राकृतिकः आत्यंतिको
नित्यश्चेति तत्र नैमित्तिकं प्रलयं निरूपयति द्वाभ्यां तदंते इति तदंते चतुर्युगसहस्रांते प्रलयस्तावान् चतुर्युगसहस्रपरिमाणः सैव ब्राह्मी रात्रिः ॥

श्रीशुक उवाच । कालस्ते परमाण्वादिर्द्विपरार्द्धावधिर्नृप । कथितो युगमानं च शृणु कल्पलयावपि ॥ १ ॥ चतुर्युगसहस्रं तु ब्रह्मणो दिनमुच्यते
स कल्पो यत्र मनवश्चतुर्दश विशांपते ॥ २ ॥ तदंते प्रलयस्तावान्ब्राह्मी रात्रिरुदाहृता त्रयो लोका इमे यत्र कल्पंते प्रलयाय हि ॥ ३ ॥ एष नै
मित्तिकः प्रोक्तः प्रलयो यत्र विश्वसृक् । शेतेऽनंतासनो विश्वमात्मसात्कृत्य चात्मभूः ॥ ४ ॥

दिनांते चतुर्युगसहस्रांते निवृत्तजगद्व्यापारः । चतुर्मुखश्चेति स नैमित्तिकः प्रलय इत्यर्थः । तदेतदाह प्रलय इति । यत्र रात्रौ इमे भूरादयस्त्रयो लोकाः प्रलया
य कल्पंते प्रलीना भवंतीत्यर्थः ॥ ३ ॥ एष नैमित्तिकः प्रलयः प्रलय इति तत्र नैमित्तिकत्वे ब्रह्मशय्यप्रवृत्तौ निमित्तमाह । यत्र विश्वसृजः शयननिमित्तं कृत्वा
हस्य प्रलयस्य नैमित्तिकत्वं । कथंभूतः शेते इत्यत्राह अनंतः शेषः आसनं शय्या यस्य सः । विश्वमात्मसात्कृत्वा आत्मगतं कृत्वा स्वस्मिन्नुपसंहृत्येति
यावत् । अत्र विश्वसृगात्मभूः ब्रह्मा ह्ययोश्च तु मुखस्वपरलोपितस्यानंतशय्यत्वं प्रासादवद्वा पर्यंकन्यायादुपपद्यते । कमलनाभिरूढोऽब्जकमलोदरशायिन
इत्यनंतशायनभगवन्नाभिपद्मशायि ब्रह्मणः स्मर्यते इति ॥ ४ ॥

नचु तत्फलीयतद्दृत्यभिप्रायमात्मस्य परस्मिन्नुदेव एवेति वदन्॥ तस्यापि किंचिह्नयं कां धारयितुं परमात्मस्वरूपं बोधयति नयस्येति त्रिभिः पद्यैः स्वत
स्तूलं परमात्मानं तीति तत्तीयेन संबंधः॥ यद्यपि नाव्याकृतलयस्थानं विवक्षितं॥ अव्यक्तस्य लयो नामाविनक्तत मो वस्थापतिः पस्य परमात्मस्वरूप
स्यकालावयवैरहोरात्रादिभिः॥ परिणामादयो गुणा न संति॥ परिणामग्राह्योद्वै॥ पूर्वावस्थापरः। तत्र हेतुरनाद्यंतमाद्यंतरहितमत एवाव्यक्तं व्यक्तेरिंद्रि
येर्नव्यज्यत इति तथा नित्यमित्युनाधंतत्वस्यैव विवरणं॥ यद्वा स्वरूपतः स्वभावतश्च नित्यं कारणमव्यक्तादि पृथिव्यंतजत्कारणं॥ अनेनाव्यक्तलयस्था
नत्वयोरपत्वं सूच्यते तथाप्यव्ययं कार्यगतैर्दोषैर्नव्येतिनवे विध्वंगच्छतीति तथा॥ १८॥ किंचनयत्रेति॥ जायते वर्द्धते इत्यादि वाचः तद्गोचरं मनश्च

म॰ण्द॰टी॰प॰ १२

न वस्य कालावयवैः परिणामादयो गुणाः॥ अनाद्यनंतमव्यक्तं नि
त्यं कारणमव्ययं॥ १८॥ न यत्र वाचो न मनो न सत्वं तमो रजो वा म
हदादयोऽमी॥ न प्राणबुद्धींद्रियदेवता वा न सन्निवेशः खलु लो
ककल्पः॥ १९॥ श्रीमते रामानुजाय नमः॥

13

यत्र न वर्तंते यत्र स्वरूपे सत्वादयो न संति॥ सत्वादिशब्दैः॥ साम्यवैषम्यावस्थं गुणत्रयं विवक्षितं॥ अनेन गुणत्रयवद्रूपत्वव्युदासः॥ देवताशब्दै
श्रोत्रज्ञानेंद्रियपराः इंद्रियशब्दः कर्मेंद्रियपरः। महदादयो न संतीत्यनेन कर्मायतमहदादिसंभूतात्मकदेहसंबंधव्युदासः॥ करणयत्तज्ञान
वतान्युदासो वा लोकाः कल्प्यंते यत्र स लोकं कल्पः सन्निवेशः ब्रह्मांडात्मकः॥ यत्र नेत्यनेन सन्निवेशस्य परमात्मस्वरूपागतत्वव्युदासः
तस्य प्रकृतिस्वरूपेगतत्वादिति भावः॥ १९॥

६

ततो मेघकल्पावलीति॥ अंग हे राजन् रभसस्वनैः तीव्रगर्जितैर्नदंति गर्जितानि करिष्यंति चेत्यर्थः॥ प्रलयेन नृत्तीया॥१२॥ तदा ब्रह्मांडविरमध्यगतं विश्वं एक
एणवोदकव्याप्तं भविष्यतीत्यर्थः॥ तदेत्यंडइह्लवे उदकह्लवरूपे सति जगति भूमेर्गंधगुणमापो ग्रसंते सो सुलीयतेइत्यर्थः॥१३॥ ग्रस्तः गंधो यस्याः सा पृथिवी
प्रलयत्वायानावायकल्पते॥ अपामिति॥ अपोनंतरमपां रसगुणं तेजो ग्रसती तिवचनविपरिणामेनानुषक्तेन संबंधः नीरसास्ता आपः लीयंते॥ अग्निस्तिवि
नक्तिविपरिणामेनावृत्तेन संबंधः॥१४॥ ततस्तेजसो रूपं वायुर्ग्रसते तदा तद्रहितं रूपरहितं तेजः वायौ लीयतेइत्युत्तरेण संबंधः वायोर्गुणं स्पर्शं खमाकाशो
ग्रसते॥१५॥ सर्वे स्पर्शरहितो वायुः हे राजन् खमाकाशं विशति तत्र लीयत इत्यर्थः॥ ततश्च नभसो गुणं शब्दं भूतादिस्तामसाहंकारो ग्रसति॥ तदनंतरगुण

ततोमेघकुलान्यंगचित्रवर्णान्यनेकशः शतवर्षाणि वर्षंति नदंति रभसस्वनैः॥१२॥ ततएकोदकं विश्वं ब्रह्मांडविवरांतरं॥ तदा भूमेर्गंधगुणं ग्रसंत्या
पउदह्लवे १३ ग्रस्तगंधातु पृथिवी प्रलयत्वाय कल्पते॥ अपां रसमथो तेजस्ता लीयंतेथ नीरसाः॥१४॥ ग्रसते तेजसो रूपं वायुस्तद्रहितं
तदा लीयते चानिले तेजो वायोः खं ग्रसते गुणं॥१५॥ स वै विशति खं राजंस्ततश्च नभसो गुणं॥ शब्दं ग्रसति भूतादिर्नभस्तमनुलीयते॥१६॥ तै
जसश्चेंद्रियाण्यंग देवान्वैकारिको गुणैः॥ महान्ग्रसत्यहंकारं गुणाः सत्वादयश्च तं ग्रसतेऽव्याकृतं राजन्गुणान्कालेन चोदितं॥१७

ग्रसनानंतरं तस्मिन्भूतादौ लीयतेइत्यर्थः॥१६॥ तैजसश्चेति॥ चशब्दः साहित्यद्योतकः राजसाहंकारसहितः वैकारिकः सात्विकाहंकारः गुणैर्वृत्तिभिः स
हदेवाद्रियाणि ज्ञानेंद्रियाणि ग्रसते ततो हंकारं त्रिविधं महान्ग्रसते ततः सत्वादयो गुणाः तं महांतं ग्रसंते गुणास्तु संतीत्युपचारः गुणमयी प्रकृतिरेव म
हांतं ग्रसतीत्यर्थः ग्रसतइति हे राजन् कालेन चालितमव्याकृतं प्रधानं गुणान्ग्रसति विषमान्समीकरोति कृतगुणं भवतीति याक्तन्महदसमीनामरूप गुणा
विनाभाव रहितं गुणसाम्यादस्थं प्रधानमव्याकृतशब्देनाभिधीयते॥१७॥

म०द्व०टी० ०
१४

ज्ञानशब्दः परमात्मवाची सत्यंज्ञानमनंतमितिश्रुतेः योगात् वुध्यादयोरूपं शरीरं यस्य तस्य भावस्तत्ता तया तु आदि सर्ववस्तुशरीरकतयैवेत्यर्थः तदाश्रयाबुध्यादिव स्ववस्त्वाश्रयाऽनेनधारकत्वमुक्तं पूर्वेणतुनियंतृत्वं नियाम्यंहिशरीरं भाति प्रामाणिकानामितिशेषः प्रामाणिकैस्तथज्ञायतइत्यर्थः अत्रहेतुमाहहृदृश्यत्वाव्यतिरेकात्स्यादिति पश्यचक्षुः शरीरंइत्यादिप्रमाणैः ...त्मशरीरत्वेन ज्ञायमानत्वादृत एवपरमात्मानं विनावस्थानायोगाच्च स एवतच्छरीरको भातीत्यर्थः परशरीरत्वेपिशरीरशरीरिणः स्वभावभेदमाह आद्यंतवदवस्तुतदिति बुद्धीन्द्रियादिकंनपरमात्मस्वरूपवन्नित्यमद्येत्वाद्यंतवदतएवतदवस्तुनवसत्यैकरूपेणत्यवस्तुसततपरिणामि २२ एवंसर्ववस्तुशरीरकत्वाद्दृश्यभावउक्तः अथविश्वशरीरकस्यतस्यकारणत्वादुपकारकत्वाद्धारणैकत्वाव्यतिरेकमाह दीपइति तेजःकार्यंहिदीपः तेजोनुग्राह्यं चक्षुःइन्द्रियाणितेजःकारणभूताहंकाकार्याणिइतियस्याश्रितंरूपंतद्धर्मः

बुद्धीन्द्रियार्थरूपेणज्ञानंभातितदाश्रयं दृश्यत्वाव्यतिरेकाभ्यामाद्यंतवदवस्तुतत् २२ दीपश्चक्षुश्चरूपंचज्योतिषोनपृथग्भवेत् एवंधीःखानिमात्राश्चनस्युरन्यतमादृते २३ बुद्धेर्जागरणंस्वप्नःसुषुप्तिरितिचोच्यते मायामात्रमिदंराजन्नानात्वंप्रत्यगात्मनि २४ यथाजलधराव्योम्निभवंतिचब्रह्मणीदंतथाविश्वमवयवस्तुदयाप्ययात् २५

अनेनदीपादेर्नैतेजोहितत्वावस्थांनंदीयत्रशेषोपलक्षितंबुद्धिरूपांतःकरणंबुद्धींद्रियार्थरूपेणपूर्वमुक्तत्वादेवंइंद्रियांतःकरणविषयाणांपरमात्मस्वरूपत्वात्तदनुग्राह्यत्वात्तदाश्रितत्वाच्चान्यतमाद्बुध्यादिभ्योपिविलक्षणात्तपाज्ञातिशब्दवाच्यात्परमात्मनःकृतेषांनावस्थानंइत्यर्थः २२ एवंसर्वस्यपरमात्मापत्तसत्तास्थितिप्रवृत्तिकत्वेस्थितेसतिजीवस्थानामपितथात्वंसिद्धंतत्राधिकंविशेषमाहबुद्धेरिति अत्रबुद्धिशब्दोजीवात्मधर्मभूतज्ञानपरःजीवस्यज्ञानविकाससंकोचविशेषरूपजागरणादिकमवस्थानात्वप्रत्यगात्मनिजीवेमायात्रयाप्रकृतिसंबंधमात्रकृतंइत्यर्थः २४ एवंविधाशेषाःसर्वाधारमपिपरमात्मानंनस्पृशंतीत्याह यथेति इदंतयाभासमानंप्रत्यक्षादिप्रमाणगम्यंविश्वमवयविब्रह्मणउदयाद्भवतितस्मिन्नेवलयात्मेनभवतिचशरीरभूतचिदचित्तात्विकाराःस्वरूपंत्वाकाशवल्लिप्यतइतिभावः २५

14

सु

नेति॥ समस्तान्नजीववक्ष्वप्नजागरादिरूपसंकोचविकारादिधर्मेस्तज्ज्ञानानाश्रयं नित्यासंकुचितधर्माश्रयमितियावत्॥ न च तत्सुषुप्तेषु प्रवस्थारादिनं
स्वप्नादपि सुषुप्तावस्थं तज्ज्ञानसंकोचस्तद्रहितं चेत्यर्थः न खं इत्यादिनाकाशजलाग्निवायवकं विजातीयविवर्हितं॥ न यव वा चो न मनश्चेत्यादि
नान च तत्सुषुप्तमिष्यं तेन जीववैजात्यमुक्तं इत्थं जीवजडाभ्यां विलक्षण परमात्मस्वरूपं शोधितं किंवस्तु नेत्यपि चेत्याह॥ संसुप्तवच्छून्यवदप्रतर्क्यं हिजीवेरेव
यथा संसुप्तस्तद्वत् शून्यशब्देनाकाशो विवक्षितः लक्ष्यं च संसुप्तेश्चरैष्ठ॥ अथ एवं परमात्मस्वरूपस्थितेपि बाह्याभ्यंतरत्रालक्षणवसुखडुः रेवादिविकारा
नवभासः॥ आकाशस्य सर्वगतत्वेपि व्याप्यगतदोषास्पर्शोस्ति॥ एवं परमात्मस्वरूपमपि चिदचिदात्मकजगदंतरात्मतया स्थितमपि बाह्याभ्यं
तरविकारविधुरमाकाशवन्निर्मलं चेत्यर्थः॥ अप्रतर्क्यं जडजीवसजातीयत्वेन न तर्क्यं किंतु मनसा कांतरेण मूलं सर्वविकारणं परमात्मस्वरूपं पदमव्यक्त

न स्वप्नजागरन्न च तत्सुषुप्तं न खं जलं नाग्निरनिलोपि नार्कः॥ संसुप्तवच्छून्यवदप्रतर्क्यं तन्मूलभूतं पदमामनंति॥
२०॥ लयः प्राकृतिको ह्येषः पुरुषाव्यक्तयोर्यदा॥ शक्तयः संप्रलीयंते विवशाः कालविद्रुताः॥२१॥

न यस्याम्नामनंति वेदांता इति शेषः॥ महान्नव्यक्ते लीयते। अक्षरं तमसि लीयते तमः परे देव एकीभवतीत्याद्या वेदांताः॥ उपपादितजडजीववैजात्यस्याप्रत
र्क्यमित्युपसंहार इत्यतो न पौनरुक्त्यं॥२०॥ प्राकृतिकप्रलयनिरूपणामुपसंहरति॥ लय इति॥ यदा पुरुषाव्यक्तयोर्लयः यदा च शक्तयः पृथिव्यादिमहदंताः
कालेन विद्रुताः चालिताः स्वस्वकारणेषु संप्रलीयंते स एष प्राकृतिको लय इत्यर्थः॥ तत्र पुरुषस्य लयो नामात्यंतज्ञानसंकोचेन परमात्मसंश्लेषविशे
ष॥ अव्यक्तस्य लयस्तु विसक्ततमोवस्थापतिरूप इत्युक्त एव॥ शक्तिशब्देन पृथिव्यादिसर्वपदार्थानां परमात्मानं प्रत्यपृथक्सिद्धविशेषणत्वं सू
चितं काव्योपयुक्तमपृथक्सिद्धविशेषणं शक्तिः॥२१॥ एतदेव सुस्पष्टं प्रपंचयति॥ बुद्ध्यादि यार्थरूपेणेति॥

न० द्व० टी० १५

किंचनदेहाकाराश्चात्मनिसंतीत्याह ॥ वैकारइति ॥ जातिगुणक्रियाजन्मवृद्ध्यादिविकारः ख्यायमानः आत्मनिदेहात्माभिमानिनांप्रतीयमानोपिप्र
त्यगात्मानमंतरालंबिनैवभवतिनतस्मिन्नस्तीत्यर्थः ॥ तदाहनेति ॥ नतस्मिन्विकारोनिरूप्योस्तीत्यर्थः ॥ विपर्ययेनिष्टमायाहृयत्निस्यादित्यादि
नाचेघघगुणत्वोपिविकारः ॥ आत्मनिस्यान्नह्यात्मवान् ॥ आशास्त्रेमनुष्युक्तात्मापितसमःदेहसमः ॥ अविज्ञातीपएवस्या ॥ दित्यर्थः ॥ चित्सम
आत्मवदितिपाठांतरंतदाविकारोप्यात्मस्वरूपवत्सदेकरूपः ॥ चित्समः ज्ञानात्मकात्मस्वरूपतुल्यः ॥ तदस्वयंप्रकाशात्मस्यान्मुक्तावप्येकरूप
तयास्वप्नयासकाशतयाचप्रतीयेतइत्यर्थः ॥ नहितथाप्रतीतिः ॥ प्रमितिरितिभावः ॥ २८ ॥ ननुख्यायमानोपिविकारःकुतआत्मनिनेत्युच्य
तेइत्यत्रोपाधिकत्वादित्याहनहीति ॥ सत्यंशब्दोत्रजीवपरः ॥ नहनुप्रविश्यसत्यंच्चाभवदितिज्ञानंचाविज्ञानंचसत्यानृतंचेति ॥ प्राणावैसत्यमि
तिचप्रयोगात् ॥ नहिपरिशुद्धजीवात्मस्वरूपस्यदेवमनुष्यादिनानात्वमस्ति ॥ यस्तुयद्येवंनानात्वमन्यतेतर्हिनसविद्वान्देहविलक्षणात्म

विकारःख्यायमानोपिप्रत्यगात्मानमंतरा ॥ ननिरूप्योस्त्यणुरपिस्याच्चेच्चित्समआत्मवत् ॥ २८ ॥ नहिसत्यस्यनानात्वमविद्वा
न्यदिमन्यते ॥ नानात्वंछिद्रयोर्यद्वज्ज्योतिषोर्वातयोरिव ॥ २९ ॥

यान्यात्मविद् ॥ पितुर्देहात्माभिमानीतिभावः ॥ औपाधिकभेदस्यजीवस्वरूपास्पर्शित्वेनभ्रमत्वेज्ञोवायवदृष्टांताइत्यभिप्रायेणाहछिद्रयोरिति ॥ पद्व्या
छिद्रयोराकाशयोर्ज्योतिषोर्वातयोर्वायथाननानात्वंतद्वदात्मनोः पूर्वापरदेहवर्तितयाभिन्नत्वेनप्रतीयमानयोरात्मनोरभेदेदृष्टांतत्वाभिप्रा
येणछिद्रयोरितिर्द्विस्यादिद्विवचननिर्देशः ॥ इयान्विशेषः ॥ भिन्नःकालौपाधिर्भेदेदेशाहिस्येतुल्यकालोपाधिकृतभेदरहितंवस्तुदृष्टांतितमितिछिद्र
योरितिद्विवचनांतेनमेघाद्युपहिताकाशद्वयेदेशोविवक्षितो ॥ घटाकाशमहाकाशोवाज्योतिःशब्देनसूर्यादिबिंबप्रतिबिंबौवातशब्देनवायुश
रीरे ॥ २२ ॥ एवमात्मनोदेहाद्यावृत्ताकारत्वप्रतिपादनेनैवदेहस्यापितत्तोव्यावृत्ताकारत्वमर्थसिद्धं ॥ तास्यांपरमात्मनोव्यावृत्ताकारतातुनतस्यकालाव
यवैरित्यादिभिस्त्रिभिःप्रतिपादितैव ॥ अथोपपादितंचिदचिद्विशिष्टस्यविचित्रजगद्रूपेणपरिणामंकार्यकारणयोरनन्यत्वंचोपसंहरन्कार्यमिथ्यात्व
परूपप्रतिक्षेपपतत्रसत्यतांचसदृष्टांतमाह ॥ यथाहिरण्यमिति ॥

15

इत्थं जगतो ब्रह्मकार्यत्वाभिधानादसत्कार्यवादः॥ फलितः तद्विरुद्धमसत्कार्यवादं निरस्यति सत्यमिति॥ अवयविनामवयवास्ताव सत्यं शोक्ता अबाधित
क्षेवाक्षियंते इत्यर्थः॥ अवयवी तु जन्तेस्योतिरिक्तः॥ अतिरिक्तत्वे तु पटावयविनः पृथगवयवादुपलब्धेरत्नचतथोपलभ्यं तेन हि पटउप्यातिरेकेण
तंतवउपलभ्यंत इत्यर्थः॥ तथा सच्छब्दवाच्याद्ब्रह्मणो न पृथग्भूतं जगद्रूपं कार्यं इति सत्कारणमेव जगदित्यर्थः॥ अंगेति संबोधनं द्योतकं अबाधित
तंत्वात्मकावयवसमुदाय एव व्यतिषंगविशेषंगत॥ पट इत्युच्यते प्रतीयते च॥ तत्र पटरूपं कार्यं न तंतुभ्योतिरिक्तं तथा प्रमाणाप्रतिपन्नं चिदचिदीश्वर स
मुदायात्मकं॥ सदेवेदं सोम्येदमित्यादिषु सच्छब्दवाच्यं इति सूत्रार्थः स्मारितः॥ एवं जगद्रूपपरिणामविशेषमापन्नं कार्यमित्युच्यते प्रामाणिकैस्तथा तेषां
प्रतीयते चातो नासत्कार्यत्वमिति भावः॥ अत्र पटवच्चेति सूत्रार्थः स्मारितः॥ २६॥ ननु बुद्धिशब्दांतरादिभिः॥ कार्यकारणयोर्भेद एवेत्यसत्कार्यत्वमे
वोचितमित्यत आह यदिति॥ घटशरावादिषु मृद्घट इति सामानाधिकरण्येन प्रतीतिविपर्यये सामान्यशब्देन मृदादिकं कारणं विवक्षितं विशेष

सत्यं ह्यवयवाः प्रोक्ताः सर्वावयविनामिह॥ विनार्थेन प्रतीयेरन् पटस्यैवांग तंतवः॥ २६॥
यत्सामान्यविशेषाभ्यामुपलभ्येत संभ्रमः॥ अन्योन्यापाश्रयात् सर्वमाद्यंतवद्वस्तु यत्॥ २७॥

शब्देन घटशरावादिविशेषाकारो विवक्षितः सच मृदो विकारः॥ ताभ्यां यद्भेदबुद्धिशब्दांतरादिभिर्द्रव्यांतरमुपलभ्येत॥ सत्कार्यवादिनां संभ्रमः कार्य
स्य द्रव्यांतरत्वोपलंभनं भ्रमात्मकः कुतः अन्योन्यापाश्रयत्वात् सामान्यविशेषयोरेव परमाधाराधेयभावेनाश्रितत्वात् सामान्यतत्कृतविकारापेक्षया
द्रव्यांतरस्यानुपलंभाद् बुद्धिशब्दांतरादीनां विकारनिबंधनत्वेनाप्युपपत्तेरिति भावः॥ एवं चिदचिदीश्वरसंघातस्य कार्यकारणे न यावत्स्यत्वं तयो
रभेदश्चेत्युपपादितमसत्कार्यवादं प्रतिक्षिप्य अपकार्यावस्थानामपि चिदचिदीश्वराणां॥ मिथो व्यावृत्ताकारतां विवक्षुस्तावदात्मस्वरूपादेह
स्य व्यावृत्ताकारमाह सर्वमिति॥ यत्सर्वं शरीरमाद्यंतवद् देहगर्भमिदं मत अवस्तु नात्मवस्त्विस्पर्धी॥ २७॥

घनो यदेति विदीर्यते वायुना विशीर्यते तदा चक्षुः स्वरूपं रविं पश्यति । एवं यदाऽहंकारः अहंकारपरिणामात्मकः अहमभिमानविषयो वा देहः स एवोपाधिरात्मनो जिज्ञासया विचारपूर्वकोपासनया नश्यति तदाऽनुस्मरेत् परमात्मानं साक्षात्कुर्यादित्यर्थः । यद्वा आत्मनो जिज्ञासया विचारेणानुस्मरेदात्मानमुपासीत तदोपाधिर्नश्यति तदोपाधिर्नश्यति ततश्च परमात्मानमीक्षत इत्यर्थः । ततस्तु तं पश्यते निष्कलं ध्यायमान इति श्रुतेरिति भावः ३३ एवमुपाधिविलयमेवात्यंतिकप्रलयमित्याह यद्देवमिति एतेन विवेकहेतिना विवेकादिसाधनसंपन्नानुग्रहीत भगवदुपासनरूपेणास्त्रेणैन मायाविकारोऽहंकारपरिणामरूपदेहसंबंध एवात्मनो बंधस्तं छित्वाऽच्युते स्वांतरात्मनि अनुभवो यस्य स अवतिष्ठत इति यस्तमेवांग हे राजन्नात्यंतिकं संप्लवं प्रलयमाहुः । तद्व्याख्यात्मविद इति कर्त्तृपदाध्याहारः ३४ अथ नित्यप्रलयं निरूपयति नित्यदेति हे परंतप राजन् ब्रह्मादीनां

घनो यदार्कप्रभवो विदीर्यते चक्षुः स्वरूपं रविमीक्षते तदा । यदा ह्यहंकार उपाधिरात्मनो जिज्ञासया नश्यति तर्ह्यनुस्मरेत् ॥ ३३ ॥
यदैवमेतेन विवेकहेतिना मायामयाहंकरणात्मबंधनं । छित्वाच्युतात्मानुभवोऽवतिष्ठते तमाहुरात्यंतिकमंगसंप्लवं ॥ ३४ ॥
नित्यदा सर्वभूतानां ब्रह्मादीनां परंतप । उत्पत्तिप्रलयावेके सूक्ष्मज्ञाः संप्रचक्षते ॥ ३५ ॥ कालस्रोतोजवेनाशु ह्रियमा-
णस्य नित्यदा । परिणामिनामवस्थास्ता जन्मप्रलयहेतवः ॥ ३६ ॥

सर्वभूतानां नित्यदा प्रतिक्षणं उत्पत्तिप्रलयौ एके केचित्संप्रचक्षते ब्रह्मादिसर्वदेहभृच्छरीराणां सततपरिणामस्वभावत्वात्तत्रोत्तरोत्तरावस्थाप्राप्तिरेवोत्पत्तिः पूर्वावस्थात्यागः प्रलय इत्याचक्षते इमावेव नित्योत्पत्तिप्रलयाविति भावः । स्थूलदृष्टिभिस्तौ न ज्ञायेते इत्यभिप्रायेण सूक्ष्मज्ञा इत्युक्तं ३५ एतदेवोपपादयति कालेति काल एव स्रोतः प्रवाहः तस्य जवेन वेगेनाशु ह्रियमाणस्येति वा पाठः भावो विषयीकृतः नदीप्रवाहवेगेन ह्रियमाणस्य तृणकाष्ठादेरुच्चनीचाद्यवस्था इवेत्यर्थः । परिणामिनां देहानां निसंयायाश्चावस्थाः ताः जन्मप्रलयहेतवः संयोगविभयतया हेतव इत्यर्थः ३६ श्रीमद्रामचंद्राय नमः ॥

व्यवहारवर्त्मसु व्यवहारमार्गेषु निमित्तभूतेषु व्यवहारस्त्वाह॥ प्रयोजनस्योपलक्षणार्थः॥ कुंडलयकटकामानुयबिभ्रहीत्यादिव्यवहारार्थं धारणादिप्र
योजनार्थं चेत्यर्थः॥ क्रियाभिः स्वनाविशेषैः कर्मेव जुवर्णं हुधा कुंडलादिभेदेन नृभिः समीयते प्रमीयते स्च नाविशेषादि क्रियाहेत्वाकारणादि
प्रयोजनार्हेलाघवकटकादिकं सत्यमेवकारणम्सुवर्णादनन्यच्चनहिसुक्तिरजतादिकमर्थक्रियार्हमिति भावः॥ एवं सूक्ष्मचिद्विशिष्टो भगवानेक
एवलौकिकैर्वैदिकैश्च वचोभिर्जनैर्विशिष्टाद्वैतवादिभिः सुव्याख्यायते विविधमाख्यायते विचित्रजगद्रूपेणपरिणतः ख्यायते कटकमुकुटकर्णिका
दिभेदैः कनकमभेदमपीष्यते॥ यथैकं सुरनरपशुपादपादिभेदैर्हरिर्जिलोप्युरीयेतेतथैकइत्याहीनि लौकिकवचांसि॥ यथासौम्यैकेन लोहमणिना
सर्वलोहमयंविज्ञातंस्याद्वाचारंभणं विकारो नामधेयं लोहमणिरित्येवसत्यमित्यादीनि वैदिकानि॥ भगवानित्यनेनकारणतारांकितहेयास्पदत्वव्याव

यथा हिरण्यं बहुधा समभीयते नृभिः क्रियाभिर्व्यवहारवर्त्मसु॥ एवं वचोभिर्भगवानधोक्षजो व्याख्यायते लौकिकवैदिकैर्जनैः॥ ३०॥
यथाघनोऽर्कप्रभवोऽर्कदर्शितो ह्यर्कांशभूतस्य च चक्षुषस्तमः॥ एवं त्वहं ब्रह्मगुणस्तदीक्षितो ब्रह्मांशकस्यात्मन आत्मबंधनः॥ ३१॥

तिः स्मृते॥ ३०॥ अथमोक्षापरपर्यायसंसृतिबंधनिवृत्तिरेवात्यंतिकः प्रलय इति विवक्षुस्तावत्कोसौ देहात्मनो बंध इत्यत्राह यथेति मेघस्यार्कप्रभव
त्वमर्करश्मिभिर्भ्रितधूमादितमोद्व्यारब्धत्वात्स्वगंतव्यं॥ आदित्योधिष्ठितचक्षुषोऽर्कांशत्वं यथार्कप्रभवोऽर्केणैव प्रकाशितश्च मेघोऽर्कांशभूतस्य च
क्षुषस्तमः तमोवदर्कदर्शनप्रतिबंधकस्तिरोधायक इति यावत्॥ अहं शब्दोत्र देहात्माभिमानिनामहमभिमानविषयत्वाद्देहपरः॥ ब्रह्मगुणः परमात्म
विशेषणभूतशरीरीक्षितस्तेन परमात्मना प्रकाशितः ब्रह्मांशकस्यात्मनः जीवस्यात्मबंधनः ज्ञानप्रतिबंधकः॥ यथार्कांशस्य चक्षुषोऽर्कदर्शनेनल
नवो मेघः प्रतिबंधकः॥ एवं परमात्मशरीरभूतस्य जीवस्य परमात्मदर्शनं लहुणाभूतो देहः प्रतिबद्धा इत्यर्थः॥ तस्मात्प्रतिबंध एव संसृति प्रतिबंधोन
मेत्यभावः॥ ३१॥ मेघविनाशे चक्षुषोऽर्कदर्शनवद्देहतिरोधानविगमे जीवस्यपरमात्मावलोकनमित्याह॥ ॥

भा०द्वा०टी० ॥
२७

सकलसद्विपनः बादरायणो व्यासः इममष्टादशसहस्रग्रंथसंख्यां निर्मीयेति शेषः ॥ वेदसंमितां वेदतुल्यां महदाह ॥ ४२ ॥ अथ भाविनी प्रवृत्तिमाह एता
मिति ॥ असौ सूत इति सूतः स्थितस्यांगुल्या निर्देशः नैमिषालये नैमिषारण्यक्षेत्रे ४३ ॥ इति द्वादशे चतुर्थः ॥ ४ ॥ एवं भागवतीसंहितां संक्ष
व्याख्याय सत्त्वे ब्रह्माधान्येन प्रतिपाद्यं निष्कृष्य पदर्शयन् देहात्मतया थात्म्यविमर्शेन पूर्वं कस्त्वशरीरशैकपरब्रह्मानुसंधाननिष्ठो स्पष्टे लौकि
कः ॥ खो मुक्तो भविष्यसीत्याह पंचमेन ॥ अत्रेत्यादिना ॥ अत्रास्यां संहितायां हरिराश्रितबंधहरो भगवाननुवर्ण्यते ॥ ततः किं तद्दृत्यत्र तस्यैव
कारणं तु ब्रह्म इत्युक्तरीत्या वरूपध्येयत्वेखापनाय सर्वकारणत्वमयस्येति ॥ यस्य हरेः सोनुवर्ण्यत इति संबंधः ॥ १ ॥ निष्कृष्य त्याज्योपादेयविभा

सवै महां महाराज भगवान्बादरायणः ॥ इमां भागवतीं प्रीतः संहितां वेदसंमितां ॥ ४२ ॥ एतां वक्ष्यत्यसौ सूत ऋषि
भ्यो नैमिषालये दीर्घसत्रे कुरुश्रेष्ठ संपृष्टः शौनकादिभिः ॥ ४३ ॥ इतिश्रीमद्भागवतद्वादशस्कंधे चतुर्वि ध प्र
...नवर्णनंनाम चतुर्थोऽध्यायः ॥ ४ ॥ ॥ श्रीशुक उवाच ॥ ॥ अत्रानुवर्ण्यतेभीक्ष्णं विश्वात्मा भगवा
न्हरिः यस्य प्रसादजो ब्रह्मा रुद्रः क्रोधसमुद्भवः ॥ १ ॥ त्वं तु राजन्मरिष्येति पशुबुद्धिमिमां जहि न जातः प्रागभू
तोद्य देहवत्त्वं न नंक्ष्यसि ॥ २ ॥ न भविष्यसि भूत्वा त्वं पुत्रपौत्रादिरूपवान् ॥ बीजांकुरवद्देहादेर्व्यतिरिक्तो यथाऽनलः ॥ ३ ॥

गमाह ॥ त्वं त्विति ॥ अनासन्नमरणानां तु संत्युपायाः प्रासन्नमरणस्त्वं इति तु शाब्दाभिप्रायः ॥ हे राजन् मरिष्य इत्येवं विधां पशुबुद्धिमविवेकं जहि ॥ अदेहत्व
त्यवेद्यस्यात्मनो नित्यत्वान्मरणाभावादिति भावः ॥ मरिष्येतीत्यत्र संधिरार्षः ॥ तदाह न जात इति ॥ न त्वं देहवत्प्रागभूतोऽविद्यमानः ॥ नोत्पन्नः नापि नंक्ष्य
सि न मरिष्यसीत्यर्थः ॥ २ ॥ भूत्वा न त्वद्य पुनः बीजांकुरवत्पुत्रपौत्रादिरूपवान्न भविष्यसि ॥ तत्र हेतुर्देहविशिष्टदेहातिरिक्त इति तत्र दृष्टांतः ॥ यथाऽ
नल इति काष्ठादिति शेषः ॥ यथा काष्ठादग्निर्व्यतिरिक्तस्तथेत्यर्थः ॥ ३ ॥ श्रीरामचंद्राय नमः ॥

17

यदि भवति क्षणमवस्थानं तर्हि किं तद्रूपं तदित्यत्राह ॥ अनाद्यंतवतेति ॥ नित्येन पुंस्त्वमात्रे ईश्वरमूर्तिनानेन कालेन यया नित्यमवस्था
स्ता नैव तद्रूपं ते ॥ उद्देशो लेदृष्टांतमाह वियत इति यथा वियत्याकाशे चरतां ज्योतिषां सूर्यादीनां प्रतिक्षणं देशांतरप्राप्तिर्नैव तद्रूपं तेन तद्वत् ॥ ३७ ॥
चतुर्थं प्रश्नत्रयनिरूपणं निगमयति नित्यइति ॥ ३८ ॥ तस्मात्सर्वात्मना राजन् हरिः सर्वत्र सर्वदा ॥ श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यश्चेच्छता भयं
इति द्वितीयस्कंधे मुमुक्षोः स्वरूपं श्रोतव्यतया प्रतिज्ञातं भगवत्कथानिरूपणं निगमयति ॥ एता इति ॥ जगद्विधातुर्जगत्स्रष्टुरत एव नाराय
णस्य नराणां प्राप्यस्य प्रापकस्याखिलसत्त्वधाम्नोऽखिलाधारस्य भगवत एताः लीलाकथाः लीलारूपाणि चेष्टितानि कथाः ते तुभ्यं

अनाद्यंतवतानेन कालेनेश्वरमूर्तिना ॥ अवस्थानैव तद्रूपं ते वियति ज्योतिषामिव ॥ ३७ ॥ नित्यो नैमित्तिकश्चैव प्राकृ
कृतिको लयः ॥ आत्यंतिकश्च कथितः कालस्य गतिरीदृशी ॥ ३८ ॥ एताः कुरुश्रेष्ठ जगद्विधातुर्नारायणस्याखिलस
त्त्वधाम्नः ॥ लीलाकथास्ते कथिताः समासतः ॥ कार्त्स्न्येन नाजोऽप्यभिधातुमीशः ॥ ३९ ॥ संसारसिंधुमतिदुस्तरमुत्तितीर्षोर्नान्यः
प्लवो भगवतः पुरुषोत्तमस्य ॥ लीलाकथारसनिषेवणमंतरेण पुंसो भवेद्विविधदुःखदवार्दितस्य ॥ ४० ॥ पुराणसंहितामेता
मृषिर्नारायणोऽव्ययः ॥ नारदाय पुरा प्राह कृष्णद्वैपायनाय सः ॥ ४१ ॥

समासतः संक्षेपतः कथिता ॥ न हि विस्तरतः कथयितुं शक्यते इत्यत्राह कार्त्स्न्येनेति ॥ अजो ब्रह्मापि कार्त्स्न्येन विस्तरेणाभिधातुं नेश्वरः न प्रभुः ॥ ३९ ॥ सत्यं कथि
ताः किमत इत्यत आह ॥ संसारेति विविधं दुःखमेव दवो दावानलः तेनार्दितस्य पीडितस्यात एवातिदुस्तरं संसारसागरं तर्तुमिच्छोः पुंसो या भगवतो लीला
कथाः तासां रसस्तन्निषेवणं विना नान्यः प्लव उत्तारणोपायः न भवेत् ॥ ४० ॥ श्रोतुरादरार्थं गौरवसंप्रदायप्रवृत्तिमाह त्रिभिः पुराणसंहितामिति ॥ एतां भाग
वतीमृषिः सर्वज्ञो नारायणो निगूढतो रूपी नारदाय प्राह चतुर्मुखद्वारा चतुःश्लोकीरूपेणोप्राहेत्यर्थः ॥ यद्वा ऋषिश्चतुर्मुखशरीरकः ॥ अथवा पूर्व
चतुर्मुखेनोपदिष्टां चतुःश्लोकीं तद्द्वयोः प्रमत्तासीन्नारायणोऽपि प्राहेत्यर्थः ॥ अन्यथा द्वितीयस्कंधांतसंदर्भेण विरोधात् स नारदः कृष्णद्वैपायनाय ॥ ४१ ॥

पु॰टी॰ ५

तत्र दृष्टांतः आकाश इवेति यथाकाशो घटाद्युपाधेराकरः परस्तद्वदाधारः देहस्य धारकः अनंतः स्वभावतोऽपरिच्छिन्नः अव्ययः स्वरूपतो विकारहीनः त
तवकिमतश्चाह एवमिति एवंविधमात्मस्थं परमात्मस्थं देहस्थं वा आत्मानं आत्मना मृश विचारय प्रत्यक्षादात्मनैवेत्युक्ति ५ बुद्ध्येति अनुमा
गर्भिण्या अनुमीयतेनेन स्वरूपार्थं स्वनुमानं शास्त्रं तद्गर्भिण्या आत्मजन्यज्ञानयुक्तयेत्यर्थः बुद्ध्यात्मविमर्शनात्मिकया वासुदेवानुचिंतया
वासुदेवानुचिंतारूपया बुद्ध्या वो ७ पले इति तं त्वां विप्रवाक्येन प्रचोदितोपि तक्षकः न धक्ष्यति तव देहं नांन जयिष्यतीत्यर्थः १० मृत्यव इति ईश्वरो
हि मृत्यूनां मृत्युरतस्त्वं मृत्यवः मृत्युहेतवः न धक्ष्यंति एवं तद्भावमपीत्यभिप्रायः अहं ब्रह्मेति ब्रह्माहमिति च तात्पर्यं तेदेन विशेषण प्रधा

॥ ॥

आकाश इव चाधारो ध्रुवोनंतोव्ययस्ततः ॥ एवमात्मानमात्मस्थमात्मनैवामृश प्रभो ९ बुद्ध्यानुमानगर्भिण्या वासुदेवानुचिंत
या चोदितो विप्रवाक्येन न त्वां धक्ष्यति तक्षकः ॥ १० मृत्यवो नोपधक्ष्यंति मृत्यूनां मृत्युमीश्वरं अहं ब्रह्म परं धाम ब्रह्माहं परमं
पदं एवं समीक्ष्य चात्मानमात्मन्याधाय निष्कले ११ दशंतं तक्षकं पादे लेलिहानं विषाननैः न द्रक्ष्यसि शरीरं च विश्वं च पृथगात्मनः
१२ एतत्ते कथितं तात यथात्मा पृष्टवान्नृप हरेर्विश्वात्मनश्चेष्टां किं भूयः श्रोतुमिच्छसि १३ ॥ ॥ इति श्रीमद्भागवते म
॥ हापुराणे द्वादशस्कंधे आत्मतत्त्वरूपाप्यं नाम पंचमोध्यायः ॥ ५ ॥

18

राम ५ १८

न्यो विशेष्यप्रधानश्च निर्दिष्टं शाब्देन ॥ परं धाम परमं पदमिति च ब्रह्मविशेषणं ॥ परमं पदं परमं प्राप्यं ॥ एवमित्यं समीक्ष्य संदधानः निष्कले प्राकृत
नो विशेष्यप्रधान इति विदेहे शरीररहिते आत्मनि परमात्मन्यात्मानं प्रत्यगात्मानमाधाय परमात्मत्वेनैव तेकसंध्याय वेत्यर्थः ११ दशंतमिति विष
५२ नौ विशेष्यप्रधान इत्यविदेहे शरीररहिते आत्मनि परमात्मन्यात्मानं प्रत्यगात्मानमाधाय परमात्मत्वेन तेकसंध्यावेत्यर्थः १२ दशंतमिति विष
युक्तैराननैर्मुखैर्लेलिहानमास्वादमानं दशंतं च तक्षकं आत्मनः परमात्मनः १८ पृथक् सिद्धं शरीरं विश्वं च न द्रक्ष्यसि न भवत्समत्वाद्देहेप्रतया
दुःखादि हेतुभूतमन्यन्न वेत्स्यसीत्यर्थः ॥ १२ अखिलप्रश्नोत्तरं निगमयति एतदिति हे तात हरेश्चेष्टां प्रति यद्यदहं पृष्टवानसि त्वयेति शेषः तमत्र
वै ते तुभ्यं कथितं कृतार्थतापरीक्षायै पृच्छति ॥ किं भूयः श्रोतुमिच्छसीति भूयः पुनः १३ ॥ ॥ इति द्वादशे पंचमः ॥ ५ ॥

स्वाप्नदेहादिवज्जाग्रद्देहाद्यप्यात्माविलक्षण इत्याह स्वप्न इति ॥ स्वप्नेयथात्मनः ॥ शिरश्छेदं स्वयं पश्यत्येवं जागरणेपि तत्र यथा दृष्टा छिद्यमानाद्देहा
द्विलक्षण एवं जागरेपीति भावः ॥ यस्मात्तु देहस्य पंचत्वादिकं मरणादिकं पश्यति ततः आत्मा देहाद्विलक्षण अतो न जीर्यते इति तथाऽमरः म
रणरहित एव ॥ ४ ॥ अस्त्वेवं ततः ॥ किमित्यत्रैवं विधविवेकयुक्तस्य मुक्तिरेव स्यादित्याह घट इति ॥ यथाकाशः घटोपहिताकाशः घटे भिन्ने सति यथा
पुराकाशः स्यात्पूर्ववन्निरुपाधिक आकाशः स्यादेवं जीवोपि देहे मृते परमात्मोपासनया निरवशेषं प्रकृतिसंबंधविगमे सति ब्रह्म संपद्यते सं
भूयावस्थो भवतीत्यर्थः ॥ ब्रह्मशब्दोत्र मुक्तात्मवाची ब्रह्मभूयाय कल्पते ब्रह्मणो हि प्रतिष्ठाहमिति प्रयोगात् ॥ ५ ॥ कथमनादेर्बंधस्य निवृत्तिरित्य
त्रौपाधिकत्वादित्यभिप्रेत्य तदुपपादयति ॥ मन इति ॥ गुणान्सत्वादिगुणमयानात्मनो जीवस्य देहान्सृजति मनसो देहसृष्टिहेतुत्वं पुण्यपा

स्वप्नेयथा शिरश्छेदं पंचत्वाद्यात्मनः स्वयं ॥ यस्मात्पश्यति देहस्य तत आत्मा ह्यजोऽमरः ॥ ४ ॥ घटे भिन्ने यथाकाश आकाशः स्याद्यथा पु
रा एवं देहे मृते जीवो ब्रह्म संपद्यते पुनः ॥ ५ ॥ मनः सृजति वै देहान्गुणान्कर्माणि चात्मनः ॥ तन्मनः सृजते माया ततो जीवस्य संसृतिः ॥ ६ ॥ स्ने
हाधिष्ठानवर्त्यग्निसंयोगो यावदीयते ॥ ततो दीपस्य दीपत्वमेवं देहकृतो भवः ॥ ७ ॥ रजःसत्वतमोवृत्त्या जायतेऽथ विनश्यति ॥ न तत्रात्मा स्वयंज्योति
र्यो व्यक्ताव्यक्तयोः परः ॥ ८ ॥

पद्वारेत्याह ॥ कर्माणीति ॥ तन्मनः कर्ममाया सृजति ततो मायामनोदेहकर्मभ्यः ॥ जीवस्य संसृतिः भवति ॥ ६ ॥ एतदेव सदृष्टांतमुपपादयति सार्द्धेन ॥ स्नेहेति ॥ दीपस्य ज्यो
तिषः दीपत्वं ज्वालारूपपरिणामः ॥ वर्तितैलस्थानीयं कर्म तदधिष्ठानस्थानीयं मनः वर्तिस्थानीयो देहः ॥ अग्निसंयोगस्थानीयो देहात्माभिमानः दीपस्थानीयः सं
सारः इति योज्यं एवं भवः संसारः देहकृतः कर्मारब्धदेहे प्रियावधि भोग इत्यर्थः ॥ अतो रजःसत्वतमोवृत्त्या गुणत्रयसंसर्गादुपाधेरात्मनो जन्ममरणा
दि स्वतस्तु तद्रहितोस्तीत्यर्थः ॥ तदेवाह नेति ॥ तत्र देहे जायमाने नश्यति च सत्यात्मा न जायते न नश्यति च ॥ तत्र हेतुः व्यक्ताव्यक्तयोः परः ॥ व्यक्तं शरीरमव्य
क्तं मूलप्रकृतिः ताभ्यां परोन्यः ॥ तत्र हेतुः स्वयंप्रकाशः विजातीयत्वादिति भावः ॥ ८ ॥

निधीयरनदुष्याजं नायगच्छं तंस्वालीढस्य रूस्य नस्वीनूतस्यपुनरं कुरादिक्रमेणोत्थापनादिषद्वारिणां तद्दवेद्दितद्विषोः संतर्थीनिवर्त्य
द्विजस्तेण५

रा०म०टी० १९

इतीति तं राजानमनुज्ञायानुज्ञाप्य नरदेवेन राज्ञा पूजितः निस्तुर्निर्मुनिनिः सहजगमत् ८ परीक्षिदथेति आत्मनि परमात्मन्यात्मानमात्मनैव समाधीय परमात्मन्येव तेकरस्याात्मानमेव ध्यात्वेत्यर्थः ९ गंगातीरे प्रागग्रदर्भेषूदङ्मुख आसीनः य थातरुस्तद्वत्स्पंदरहित सर्वेन्द्रियव्यापारः निःसंगः देहतदनुबंधाभिमानरहितः छिन्नाः संशयाः देहात्मजीवपरमात्मभेदाभेदादिसंशया येन सः महायोगी महासमाधियुक्तः ब्रह्मभूतः सम्यग्भावस्थः ब्रह्मस्वरूपो मुक्तावस्थजीवपरः मुक्तो नवदित्यर्थः १० तदा हे विप्राः कुद्धेन द्विजसूनुना प्रचोदितः तक्षकः नृपं हंतुकामो गच्छन्पथि काश्यपं ददर्श ११ तं विषचिकित्सया परीक्षिद्रक्षणोन्मतिरोहितः सन्नद्रव्यात् १२ निर्जीवस्य शरीरस्य दंशनेन सजीवकरणं पुनः कृत्यमिव जातमिति उत्थापयत्याह

सूत उ० इत्युक्तस्तमनुज्ञाप्य भगवान्बादरायणिः जगाम भिक्षुभिः साकं नरदेवेन पूजितः ८ परीक्षिदपि राजर्षिरात्मन्यात्मानमात्मना समाधाय परं दध्यावस्पंदासुर्यथा तरुः ९ प्राक्कूले बर्हिष्यासीनो गंगाकूल उदङ्मुखः ब्रह्मभूतो महायोगी निःसंगश्छिन्नसंशयः १० तक्षकः प्रहितो विप्राः क्रुद्धेन द्विजसूनुना हंतुकामो नृपं गच्छन्ददर्श पथि काश्यपं ११ तं तर्पयित्वा द्रविणैर्निवर्त्य विषहारिणं द्विजरूपप्रतिच्छन्नः कामरूपोऽदशन्नृपं १२ ब्रह्मभूतस्य राजर्षेर्देहोऽहिगरलाग्निना बभूव भस्मसात्सद्यः पश्यतां सर्वदेहिनां १३ हाहाकारो महानासीद्भुवि खे दिक्षु सर्वतः विस्मिता ह्यभवन्सर्वे देवासुरनरादयः १४ देवदुंदुभयो नेदुर्गंधर्वाप्सरसो जगुः ववृषुः पुष्पवर्षाणि विबुधाः साधुवादिनः १५ जनमेजयः स्वपितरं श्रुत्वा तक्षकभक्षितं यथाजुहाव संक्रुद्धो नागान्सत्रे सह द्विजैः १६

ब्रह्मभूतस्येति मुक्तावस्थां प्राप्तस्य राजर्षेर्देहः सर्वदेहिनां [illegible] पश्यतां सतां सद्य एव गरलाग्निना भस्मसादभवत् १३ तत्क्षणं सर्वेषां भुवः खं ततः परं सर्वं चाहाहाकार इति नु विस्मिता का शेषः सर्वतः सर्वासु दिक्षु [illegible] देवदुंदुभयः इति स्वयमेव दध्वनुः १४ प्रासंगिकमाह जनमेजय इत्यादिना वाक्यतिमित्यतेन तदा सत्रे क्रोधेन प्रारब्धे सर्पाभिचारयागे सर्पाणां जुहाव मंत्रैराचकर्ष सर्वसर्पाकानेकारणं कुरु इति १६

रा०म० १९

वाम्यांश

19

आत्मनः सिद्धतां कृतज्ञतां चाविः कुर्वन्नाह राजेत्यादिसूत्र ॥ एवमिति मुनिना शुकेनाभिहितं किं चक्र इति श्रोतुमिच्छसीत्येतन्निशम्य ॥ कथं नृपेण स-
मेनेति भावप्रधानो निर्देशः ॥ साम्येन निखिलात्मनः पश्यतीति तथा तेन तेन नृपेण मूर्ध्ना तस्य पादमुपसृत्य संस्पृश्य पश्यन् विस्फुरातः परीक्षि-
त्तं मुनिं प्रतीदं वक्ष्यमाणमाह ॥ १ ॥ सिद्ध इति ॥ उक्तिमेवाह सिद्धोस्मीति ॥ सिद्धार्थोस्मि कुतः यतः भवतानुगृहीतोस्मि कोसावनुग्रहः मे मह्य-
मनादिनिधनो हरिः ॥ चक्षुषा साक्षात्तत्त्वापायुष्मश्रावित इति पूर्वेण ॥ २ ॥ करुणात्मतामाविष्करोति ॥ नेति ॥ अच्युते ॥ आत्मात्मनो ये वा तेषां मतए-
व महत्तां यत्त्वाऽशल्पसोप्यशीत्यादिगुणोत्कृष्टानां भवतामिदं नात्यद्भुतं ॥ किं तद्यदज्ञेष्वेषु त एव तावयतस्तेषु मादृशेषु शुश्रूषुभूतेष्वनुग्रह इत्येत

सूत उवाच ॥ एतन्निशम्य मुनिनाभिहितं परीक्षिद्व्यासात्मजेन निखिलात्मदृशा समेन ॥ तत्पादमूलमुपसृत्य नतेन मूर्ध्ना बद्धाञ्जलिस्तमि-
दमाह स विष्णुरातः ॥ १ ॥ राजोवाच ॥ सिद्धोस्म्यनुगृहीतोस्मि भवता करुणात्मना ॥ श्रावितो यच्च मे साक्षादनादिनिधनो हरिः ॥ २ ॥ ना-
त्यद्भुतमहं मन्ये महतामच्युतात्मनां ॥ अज्ञेषु तापतप्तेषु भूतेषु यदनुग्रहः ॥ ३ ॥ पुराणसंहितामेतामश्रौष्म भवतो वयं ॥ यस्यां खलूत्तमश्लो-
को भगवाननुवर्ण्यते ॥ ४ ॥ भगवंस्तक्षकादिभ्यो न बिभेम्यहं ॥ प्रविष्टो ब्रह्म निर्वाणमभयं दर्शितं त्वया ॥ ५ ॥ अनुजानीहि मां ब्र-
ह्मन् वाचं यच्छाम्यधोक्षजे ॥ मुक्तकामाशयं चेतः प्रवेश्य विसृजाम्यसून् ॥ ६ ॥ अज्ञानं च निरस्तं मे ज्ञानविज्ञाननिष्ठया ॥ भवता द-
र्शितं क्षेमं परं भगवतः पदं ॥ ७ ॥

वर्धां

तु ॥ ३ ॥ पुराणसंहितामिति भगवतः सकाशात् अश्रौष्म श्रुतवन्तः ॥ कथंभूतां यस्यां संहितायां ॥ ४ ॥ सिद्धोस्मीत्येतदुपपादयति ॥ भगवन्निति अभय-
हेतुत्वेनात्मानं विशिनष्टि ॥ त्वया दर्शितमभयं निर्वाणं वा आनंदरूपं ब्रह्म प्रविष्टः तदनुभवन्नस्मीत्यर्थः ॥ ५ ॥ यदुक्तं किं भूयः श्रोतुमिच्छसीति
तत्र सिद्धोहं न किंचिच्छ्रोतुमिच्छामि किं त्वनुज्ञां देहीत्याह अनुजानीहि इति हे ब्रह्मन् वाचं यच्छामि मौनं विधास्यामि मुक्ताः कामा आशया यास्तद्वासना
अ यस्मात्तच्चेतः अधोक्षजे निवेश्यासून् प्राणान्विसृजामि तदर्थं मामनुजानीहि ॥ ६ ॥ पुनः सिद्धार्थतामेवाविःकरोति ॥ अज्ञानमिति ॥ ज्ञानं तत्पदे
राजन्यं विज्ञानं भगवदनुभवात्मकं तन्निष्ठया ॥ ज्ञानं देहात्ममममत्वं चात्मत्वमभिमतत्वं निरस्तं भवता क्षेमं कैवल्यं सुखरूपं भगवद्वैतः ॥ पदं स्वरूपं
यतो दर्शितं च ॥ ७ ॥

नन्वपरोक्षत्वं श्रवणेनमस्तित्यैतावद्भ्योहष्ट। नतुकर्मणोऽस्यन्त्वमाह सर्पेति सर्पादिभिः जंतुपंचत्वंमरणमृच्छतिप्राप्नोतिइतियत्तदारब्धंकर्मैवभुंक्ते स्वकृतकर्मत्रयमुक्ताः सर्पादयोनस्वतन्त्राइतिभावः॥ २६॥ तस्मादिति॥ यदेवंतस्माद्धे राजन्नित्वमाभिचारिकंसत्रंसंस्थापयेतसमाप्यतांवृथानिरपराधाः सर्पादग्धाः कुतः हियस्माज्जनैर्दिष्टंप्रारब्धमेवभुज्यते॥ २७॥ इतीतिसजनमेजयः महर्षेर्बृहस्पतेर्वचोमानयंस्तथेत्याह सर्पसत्रंसमाप्यतामित्या ह॥ सर्पसत्रादिति॥ वाक्पतिर्बृहस्पतिः॥ २८॥ ननुकथंविदुषामप्येवंसंमोहंनयतोब्राह्मणक्रोधात्स्वरीक्षितोमृत्युः जनमेजयकोपाच्चसर्पा णामित्यादितत्राहसैषेति बाध्यबाधकेतिमायावृथानोनिर्दिष्टा॥ बाध्यत्वबाधकत्वेलक्षयत्यापादयतीतितथा॥ तत्त्वंनसासाक्षात्किंतुजीवमोहनद्वारेत्य भिप्रेत्याहययेति॥ ययामायानिदानभूतयाभूतेषुश्रौ विषयेषुगुणवृत्तिभिः क्रीडादिभिरसावात्मामुह्यतेविष्णोर्महामायेतिविष्णोर्माया संबंधोक्त्या

पर्यचोरारिकत्वंबुसुस्तरव्याप्यादिभिर्दर्प॥ पंचत्वमृच्छतेजंतुर्भुंक्तेप्रारब्धकर्मतत्॥ २६॥ तस्मात्सत्रमिदंराजन्संस्थीयेताभिचारिकं॥ स र्पाअनागसोदग्धाजनैर्दिष्टंहिभुज्यते॥ २७॥ सूतउ०॥ इत्युक्तः सतथेत्याहमहर्षेर्मानयन्वचः॥ सर्पसत्रादुपरतः पूजयामासवाक्पति २८॥ सैवाविष्णोर्महामायाबाध्यबाधकलक्षणा॥ ययामुह्यन्त्यसावात्माभूतेषुगुणवृत्तिभि॥ २९॥ नयत्रदुर्भाव्यतयाविभाव्यतेमायात्म वादेसकृदात्मवादिभि॥ नयद्विकारोविविधस्तदाश्रयोमनश्चसंकल्पविकल्पवृत्तियत्॥ ३०॥

२९॥ नस्यापितयामोहादिशंकांवारयन्समाधिदशायामनुसंधेयंपरमात्मस्वरूपमाह॥ नयत्रेति॥ स्वात्मवादिभिः परमात्मस्वरूपनिरूपकैः सकृदप्यात्मवादेपरमात्मस्वरूपनिरूपणेक्रियमाणेदुर्विभाव्यतयादुर्विभाव्यत्वेननविभाव्यातेस्वकार्यकरणेनावतिष्ठतेसामाया यत्र परमात्मस्वरूपेनस्वकार्येक्षमेतिकिंपुनर्वक्तव्यमित्यर्थः॥ किंचयद्यत्रपरमात्मनितदाश्रयः॥ मायाश्रयः मायाप्रयुक्तमोहमूलकः॥ विवि धोविकारः कुतर्करूपोनास्तितस्यतदविषयत्वादितिभावः॥ यद्यत्रसंकल्पविकल्पात्मवर्त्ततइतितथातन्मनश्चनास्तितद्विषयीक रोतिनिवृत्तसंकल्पविकल्पयोगपरिशुद्धमनोविषयत्वादितिभाव॥ ३०॥

रा

सर्पसत्रइ सिद्धे प्रज्वलिते हूयमानान् दृष्ट्वा तक्षकाख्यः सर्पः इन्द्रं शरणं ययौ ॥१७॥ अपश्यन्निति पारीक्षितः परीक्षितः पुत्रः न तक्षकम् अप्रद्विजानुवाच
उक्तिमेवाह तक्षक इति ॥१८॥ इत्यं पृष्टाः प्रकुः । विप्राः ॥ तमिति ॥ हे राजेन्द्र तं तक्षकं स्वसंमतं शक्र इन्द्रः गोपायति तस्मात्तेन शक्रेण संस्तंभितः निवारितो शरणं
सो तक्षकः सर्पो वह्नौ न पतति ॥१९॥ इति विप्रवचः श्रुत्वा पारीक्षित उदारधीः विपुलबुद्धिः पुनः ऋत्विजः प्राह तदेवीदं सहेंद्र इति हे विप्राः तदीन्द्रसहि
तः तक्षकः किमिति न पात्यते ॥२०॥ तत्पारीक्षितोक्तं श्रुत्वा विप्रा ऋत्विग्गीजाः ॥ मखे यागे सहेन्द्रं तक्षकमाजुहुवुः आह्वानप्रकारं दर्शयति तक्षकेति

सर्पसत्रे समिद्धाग्नौ हूयमानान्महोरगान् दृष्ट्वेन्द्रं भयसंविग्नस्तक्षकः शरणं ययौ ॥१७॥ अपश्यंस्तक्षकं तत्र राजा पारिक्षि
तो द्विजान् उवाच तक्षकः कस्मान्न दह्येतोरगाधमः ॥१८॥ विप्रा ऊचुः तं गोपायति राजेन्द्र शक्रः शरणमागतं तेन संस्तं
भितः सर्पस्तस्मान्नाग्नौ पतत्यसौ ॥१९॥ सत्व उ० पारीक्षित इति श्रुत्वा प्राहर्त्विज उदारधीः सहेन्द्रस्तक्षको विप्रा नाग्नौ
किमिति पात्यते ॥२०॥ तच्छ्रुत्वाजुहुवुर्विप्राः सहेन्द्रं तक्षकं मखे तक्षकाशु पतस्वेह सहेन्द्रेण मरुत्वता ॥२१॥ इति ब्रह्मोदि
ताक्षेपैः स्थानादिन्द्रः प्रचालितः बभूव संभ्रान्तमतिः सविमानः सतक्षकः ॥२२॥ तं पतन्तं विमानेन सहतक्षकमम्बरात्
विलोक्याङ्गिरसः प्राह राजानं तं बृहस्पतिः ॥२३॥ बृहस्पतिरु० नैष त्वया मनुष्येन्द्र वधमर्हति सर्पराट् अनेन पीतममृ
तमतो यमजरामरः ॥२४॥ जीवितं मरणं जन्तोर्गतिः स्वेनैव कर्मणा ॥ राजंस्ततोऽन्यो नान्यस्य प्रदाता सुखदुःखयोः ॥२५॥

हे तक्षक मरुत्वता मरुद्गणयुक्तेन इन्द्रेण सहाग्नावाशु पतस्वेति ॥२१॥ इत्थं ब्रह्मोदितैर्ब्राह्मणैरुदिताक्षेपैः आह्वानरूपैरुवाक्यैः स विमानः सतक्षकः स्थानाच्च्या
वितः संभ्रान्तमतिश्चलितचित्तो बभूव ॥२२॥ पतन्तं तमिति तमिन्द्रं अम्बरात्पतन्तं तमवलोक्याङ्गिरसः पुत्रो बृहस्पतिः राजानं जनमेजयं प्राह ॥२३॥ तदाह वचनु
ष्टेन हे मनुष्येन्द्र एष सर्पराट् तक्षकः त्वया वधं नार्हति न वध्य इत्यर्थः तत्र हेतुः अनेन तक्षकेण ॥२४॥ पितृघातकतक्षकविषयक्रोधशमा
र्थम् उपदिशति जीवितमिति जन्तोः प्राणिनः गतिः स्वर्गनरकादिगतिश्च अतो हे राजन् तेन स्वकर्मणा विना सुखदुःखप्रदः नान्योऽस्तीत्यर्थः ॥२५॥

भा० द्वा० टी० म
२१

शास्त्रसमाप्तौ गुरुनमस्कारात्मकं मंगलमाचरति॥ नम इति॥ कृष्णाय कृष्णद्वैपायनायाकुंठमेधसेऽसंकुचितबुद्धये॥ अध्यगामधिगतवानस्मि॥ ३४॥ इमां संहितामध्यगामित्युक्तं॥ तत्र पुराणसंहिताविभागविशेषतो बुभुत्सुस्तावत्तन्मूलभूतवेदविभागं पृच्छति शौनक॥ पैलादिभिरिति॥ वेदाचार्यैः वेदाचारनिरतैः॥ तत्सत्वक्ते कैश्च कतिधा व्यस्ताः विभक्ताः॥ एतद्विभागवैविध्यं नोऽस्मभ्यमभिधेहि॥ ३५॥ इत्थमापृष्टस्सं विभागं विवक्षुस्तावद्धिरण्यगर्भाज्जन्म विभागेनैव प्रवृत्त इति वक्तुं तावद्वेदादिनादक्रममाहाष्टभिः॥ समाहितेति॥ हे ब्रह्मन्शौनक भगवति समाहितमात्मा मनो येन तस्य परमेष्ठिनश्चतुर्मुखस्य हृदयाकाशात्तस्मान्नादोऽभूत् तन्नादाकाशसंस्पृष्टवायुपरिणामात्मा

य तद्दैवत् १

नमो भगवते तस्मै कृष्णायाकुंठमेधसे॥ यन्मुखांबुरुहध्यानात्संहितामध्यगामिमां॥ ३४॥ शौनक उ०॥ पैलादिभिर्व्यासशिष्यैर्वेदाचार्यैर्महात्मभिः॥ वेदाश्च कतिधा व्यस्ता एतत्सौम्याभिधेहि नः॥ ३५॥ सूत उ०॥ समाहितात्मनो ब्रह्मन्ब्रह्मणः परमेष्ठिनः॥ हृद्याकाशादभून्नादो वृत्तिरोधाद्विभाव्यते॥ ३६॥ यदुपासनया ब्रह्मन्योगिनो मलमात्मनः॥ द्रव्यक्रियाकारकाख्यं धूत्वा यांत्यपुनर्भवं॥ ३७॥ ततोऽभूत्त्रिवृदोंकारो योऽव्यक्तप्रभवः स्वराट्॥ यत्तल्लिंगं भगवतो ब्रह्मणः परमेष्ठिनः॥ ३८॥ श्रीराम

दभून्नादं विशिनष्टि यो वृत्तिरोधाच्छ्रोत्रवृत्तिनिरोधाद्विभाव्यते श्रोत्रपिधानाच्छ्रूयत इत्यर्थः॥ ३६॥ किंच यस्य नादस्योपासनया योगिनः योगीश्वराः॥ द्रव्यक्रियाकारकाख्यमात्मनो मलं विधूयापुनर्भवं मोक्षं प्राप्नुवंति ज्ञानोत्पादकत्वात्तदुपासनाया इति भावः॥ द्रव्यं शरीरं क्रिया पुण्यापुण्यात्मकं कर्म कारकं इंद्रियं एवं त्रिधा ख्यायते तेन इति तथा देहेंद्रियतज्जनितपुण्यापुण्यकर्माख्यं मलमित्यर्थः॥ ३७॥ ततो नादात्त्रिवृदोंकारोऽभवत्स्वधर्मरूपैः साधारणरूपेण प्रतिपन्नः॥ शब्दः प्रणवरूपेण व्यक्तोऽभूदित्यर्थः॥ त्रिवृत्त्रयाणामकारोकारमकाराणां वृत्तेर्नभसि स्थः त्रिमात्रो वा॥ तमेव विशिनष्टि अव्यक्तप्रभवः अयोगिभिर्ज्ञातुमशक्यः स्वयमेव जात इति स्वराट् यत्तद्ब्रह्मणः परमात्मनो लिंगं ज्ञापकं वाचकं यस्य॥

इति ष प्रणवा १

किंचनेति॥ सृज्यं शरीरं सृजतीति सृजत्कर्म तेन सह सृज्यं यत्र नास्ति कर्म तदापत्तं शरीरं च यत्र नास्तीत्यर्थः॥ उभयोः कर्मतत्फलयोः तदे
हयोः परं तान्मां साध्यं सुखदुःखादिरूपं फलं च यत्र नास्तीत्यर्थः॥ वचश्च देवमनुष्यादिशब्दजातं च यत्र न वर्त्तते तद्विर्षे नूतं परमात्मस्व
रूपं इत्यर्थः॥ तत्तः किं मतत्राह जीवः स्वयं त्रिनिरन्वितो पि गुणत्रयवर्ज्यो पि तन्मुनिः॥ तादृशं परमात्मस्वरूपं मननेन परः एतद्दृष्टिव्या
द्याचितत्वेन विधूय रिक्तत्व कर्मानन्त्रानायपिपासाशोकमोहजरामृत्युं श्च निषिध्य विरमेत्समाहितं मनस्कतया निवृत्तव्यापारो भवेत्॥ तन्त्रा
दित्वबाध्यबाधकमिति क्रियाविशेषणं परस्परं भङ्गवा भिन्नबहेतुन्न तं॥ एतत्रयं पथोत्साहितं स्यात्तथा निषिध्येत्यर्थः॥ ३०॥ किंच तदेव वैष्ण
वं पदं परमात्मनंति वैष्णवमित्यभेदसंबंधे विशेषणं परं ब्रह्म ति पुरुषविल्लक्षणं पदं सर्वोत्कृष्टं वा यद्यत इति पदं स्वरूपं किं तत्॥ यन्नेतिने

नयत्र सृज्यं सृजतोनयोः परं वचश्च जीवस्त्रिनिरन्वितस्त्वहं॥ तदेतदुत्सादितबाध्यबाधकं निषिध्य चोर्मीन्विरमेत्स्वयं मुनिः॥ ३०॥ परं
पदं वैष्णवमामनंति तद्यन्नेति नेतीत्यतदुत्सिसृक्षवः। विसृज्य दौरात्म्यमनन्यसौहृदा हृदोपगुह्यावसितं समाहितैः॥ ३१॥ तएत तदधिगच्छं
ति विष्णोः परमं पदं॥ अहं ममेति दौर्जन्यं न येषां देहगेहजं॥ ३२॥ अतिवादांस्तितिक्षेत नावमन्येत कंचन॥ न चेमं देहमाश्रित्य
वैरं कुर्वीत केनचित्॥ ३३॥

तिपूर्कतिप्राकृतजडाजडवस्तु याः स्वांतःस्थांजनवतीत्यतदुत्सिसृक्षवः॥ तद्व्यतिरिक्तचेतनाचेत
नं व्यावर्तयितुं इच्छवः दौरात्म्यं रागद्वेषादिकमहंममाभिमानं वा विसृज्य अनन्यसौहृदाः॥ नान्यस्मिन् जगवद्व्यतिरिक्ते सौहृदं येषां ते हृदो
पगूह्य ध्यानादिभिरासंश्लिष्य समाहितैः समाधिनिष्ठैः अवसितं निश्चितं मनुभूतं॥ ३१॥ दौरात्म्यं विसृज्येत्युक्त्या तत्त्यागस्य साधनं निष्ठा ह
नद्वारा भगवत्प्राप्तिसाधनत्वं सूचितं तस्पष्टमेवाह॥ त इति॥ येषां देहगेहजं तद्विषयमहंममेति दौर्जन्यं नास्ति त एते तद्विष्णोः परमं पद
मधिगच्छंति उपासनया साक्षात्कुर्वंति गत्यर्थाबुद्ध्यर्थाः प्राप्नुवंतीति वा॥ ३२॥ तदेवं बाध्यबाधकभावस्य भगवन्मायाप्रयुक्तत्वमभिधा
याथ तदनुप्रसक्तं च परिहर्तं तन्मायातितीर्षूणां वृत्तिमाह॥ अतिवादानिति॥ अतिक्रांतवादान्विरुद्धवादान्परुषवचांसीति यावत्॥ इमं
मर्त्यदेहमाश्रित्यात्मीयत्वेनाभिसंधाय केनचिदपि वैरं न कुर्यात्॥ ३३॥

तेनैवेति । तेनाक्षरसमाम्नायेनैवासौ चतुर्मुखश्शरीरको विभुश्चतुरो वेदानाविःकृतवानिति शेषः । ततश्चातुर्होत्रविवक्षया चत्वारो होता
रः । अध्वर्यूद्गातृब्रह्माण ऋत्विजः । तैरनुष्ठेयं कर्म चातुर्होत्रं तद्विवक्षया यज्ञप्रकाशनेच्छयेत्यर्थः । सव्याहृतिकान्सप्रणवान्चतुरो वेदान्पुत्रा
न्मरीच्यादीनध्यापयत् ४२ पुत्रानिति तिगतिवुद्ध्यादिनाकर्मत्वे द्वितीया । पुत्रान्विशिनष्टि ब्रह्मकोविदान्वेदोच्चारणादिनिपुणान् । ते
तु मरीच्यादयो वैदिकधर्मोपदेष्टारः स्वपुत्रेभ्यः कश्यपादिभ्यः समादिशन्नुपदिष्टवन्तः ४४ एवं परंपरया तत्तच्छिष्यैस्तेषां तेषां शिष्यैर्धृत
व्रतैर्महर्षिभिः चतुर्युगेषु प्रतिचतुर्युगपर्यायं प्राप्तास्तत्र प्रवृद्धे द्वापरादौ द्वापरमादिर्यस्य तत्संधिलक्षणकालस्य तस्मिन्द्वापरांते वेद
विभागप्रसिद्धेः । शांतनुसमकालत्वं व्यासावतारप्रसिद्धेश्च ४५ कोऽनंतः युगधर्मतः क्षीणायुषः अल्पायुष्कान् क्षीणसत्वानल्लोके

तेनैवासौ चतुर्वेदांश्चतुर्भिर्वदनैर्विभुः । सव्याहृतिकान्सोंकारांश्चातुर्होत्रविवक्षया ४२ पुत्रानध्यापयत्तांस्तु ब्रह्म
र्षीन्ब्रह्मकोविदान् । ते तु धर्मोपदेष्टारः स्वपुत्रेभ्यः समादिशन् ४४ ते परंपरया प्राप्तास्तत्तच्छिष्यैर्धृतव्रतैः । चतुर्यु
गेष्वथ व्यस्ता द्वापरादौ महर्षिभिः ४५ क्षीणायुषः क्षीणसत्वान्दुर्मेधान्वीक्ष्य कालतः । वेदान्ब्रह्मर्षयो व्यस्यन्
हृदिस्थाच्युतचोदिताः ४६ एतस्मिन्नंतरे ब्रह्मन्भगवान्लोकभावनः । ब्रह्मेशाद्यैर्लोकपालैर्याचितो धर्मगुप्त
ये ४७ पराशरात्सत्यवत्यामंशांशकलया विभुः । अवतीर्णो महाभाग वेदं चक्रे चतुर्विधं ४८ ॥

ल्पबलानल्पबुद्धीञ्जनानवलोक्य व्यस्तविभक्ता इत्यन्वयः । व्यसनं नामापारेभ्यः चतुर्भ्यो वेदराशिभ्य उद्धृत्य संहिताकरणेन प्रवर्तनं त
द्धि पुरुषबुद्धिप्रभवत्वाद्नादरणीयत्वं स्यादित्याशंक्याह वेदानिति । हृदिस्थेनाच्युतेन चोदिताः वेदान्व्यस्यन्विभक्तवंतः न तु स्वबुद्ध्ये
ति भावः ४६ तत्र विद्धे मौने चतुर्युगे द्वापरादौ वेदविभागक्रमं विशेषतो निरूपयति । एतस्मिन्नित्यादिना । एतस्मिन्नंतरे वैवस्वतम
न्वंतरे अष्टाविंशतिचतुर्युगद्वापरादौ इत्यर्थः । लोकभावनः लोकान्भावयत्युद्दितान्करोतीति तथा । हेतुगर्भमपीदं व्यतः ब्रह्मे
शाद्यैरिति ४७ सत्यवत्यामंशांशकलयेयावतीर्णः हे महाभाग शौनक ४८

वैवस्वतमन्वंतर २

कोसौपरमात्मेत्यत आह। सर्वस्याप्रणवस्य लक्ष्यवाचकतामाह। शृणोतीति सार्द्धेन। सुप्तश्रोत्रेणेति समस्तं पदं। यइमं स्फोटं प्रणवरूपं शब्दं सुप्तश्रोत्रेणापि शृणोति श्रोत्रे पिहिते सत्यपि शृणोतीत्यर्थः। यःश्रोत्रयोर्दृढपिहितयोः सतोरिमं स्फोटं शृणोति सपरमात्मैव न तु जीवस्तस्य करणायत्तज्ञानत्वादिति भावः। परमात्मा तु करणायत्तज्ञानइत्याह श्रुत्यादिगिति श्रुत्यधीन्द्रियवर्गे पश्यतीति श्रुत्यदृग्जीवस्य नाशेपलब्धिस्तु परमात्मवृत्तेरेवेति भावः। यद्वाप्रणवमेव भिन्नं दृश्य शृणोतीति श्रुत्यदृग्वार्थान्तरज्ञानरहितः। पिहितकर्णे नविषया नारागोचरतया अप्रमाणमित्यर्थः। येनवाग्व्यज्यते अचोदिता सत्यभिव्यज्यते यस्मात्मन आकाशोऽव्यक्तिः शरीरं यद्वा येन प्रणवेन वाग्व्यज्यते लौकिक वैदिकशब्दराशिरभिव्यज्यते धरस्यात्मनः प्रणवस्य स्वरूपस्याकाशहृदयाकाशव्यक्तिरभिव्यक्तिस्थानं॥ ४०॥ स्वधाम्नःस्वमहिम्नि प्रतिष्ठितस्य ब्रह्मणः परमात्मनो वाचकः॥ किंच

शृणोति यइमं स्फोटं सुप्तश्रोत्रेण श्रुत्यदृक्॥ येन वाग्व्यज्यते यस्य व्यक्तिराकाश आत्मनः॥ ४०॥ स्वधाम्नो ब्रह्मणः साक्षाद्वाचकः परमात्मनः॥ स सर्वमन्त्रोपनिषद्वेदबीजं सनातनं॥ ४१॥ तस्य ह्यासंस्त्रयो वर्णा अकाराद्या भृगूद्वह॥ धार्यंते यैस्त्रयो भावा गुणनामार्थवृत्तयः॥ ४२॥ ततोऽक्षरसमाम्नायमसृजद्भगवानजः॥ अंतस्थोष्मस्वरस्पर्शह्रस्वदीर्घादिलक्षणं॥ ४३॥

सर्वेषां मंत्राणामुपनिषदां वेदानां च बीजं कारणं सनातनं इत्यनेन तस्य हृदयाकाशे अभिव्यक्तिमात्रं न तूत्पत्तिरित्यभिप्रेतं॥ ४१॥ तस्येति हे भृगूद्वह तस्य प्रणवस्य वाच्यया अकाराद्या अकारोकारमकारास्त्रयो वर्णा आसन्नाविर्बभूवुः। यद्वा तस्य प्रणवस्य प्रकृतिभूतास्त्रयो वर्णाः तानेव विशिनष्टि धार्यंत इति यैरकारादिभिस्त्रयो भावास्त्रयोऽर्थाः अनन्यादिशेषत्वानन्यशरणत्वानन्यभोग्यत्वरूपा गुणनामार्थाप्यत्वप्रपकवाधारत्वादि गुणप्रतिपादकानां नारायणादिनाम्नां स्वार्थे वृत्त्याख्यवृत्तयो विधाश्च धार्यंते प्रकाश्यंते तयाकारणतया चेति भावः॥ ४२॥ ततः प्रणवादक्षरसमाम्नायम् अक्षरसमाहारमसृजदजश्चतुर्मुखशरीरकः परमपुरुषः। अक्षरसमाम्नायमेव विवृणोति अंतस्थेति यरलवाश्चांतस्थाः शषसहा ऊष्माणः अच स्वराः कादयो मावसानाः स्पर्शाः ह्रस्वदीर्घशब्दो भावप्रधानो आदिशब्देन प्लुतत्वोदात्तत्वस्वरितत्वादि संग्रहः कोदयोमा स्वरधर्मसंग्रहः। जिह्वामूलीयोपध्मानीयसंग्रहश्च अंतस्थादयो लक्षणं स्वरूपं यस्य तमक्षरसमाम्नायं इति संबंधः॥ ४३

स्वां संहितां स्वसुतं कविं शिष्यं संमांडकेयसुतं शिष्यं समध्यापयामास ॥ तस्य मांडकेयस्य शिष्यो वेदमित्रो सौनर्यादिभ्यः शिष्येभ्यः ५५ ॥ तत्सुतः मांडुकेयसुतः शाकल्यस्तु स्वां संहितां पंचधा विभज्य वात्स्यादिषु पंचस्वधात्तानध्यापयामासेत्यर्थः ॥ ५६ ॥ तच्छिष्यः शाकल्यशिष्यो जातूकर्ण्यस्तु स निरुक्तां स्वस्वसंहितां विभज्य निरुक्तं नाम वैदिकपदव्याख्यानं तेन सार्कं चतुर्धा विभज्येत्यर्थः ॥ शालाकादिभ्यश्चतुर्भ्यो ददौ ५७ ॥ बाष्कलिः पूर्वोक्तबाष्कलस्य पुत्रः प्रातिशाख्ये स्मृत्युक्तसर्वशाखास्य तद्दत्ते तिशेषः वालखिल्याख्यां शाखां चक्रे पैलायन्यादयः त्रयः आददुः ५८ एवमुक्तशाखाविभागप्रकारमभिधाय तच्छ्रवणफलमाह ॥ बह्वृच इति ॥ एतच्छंदसां एतेषां छंदसां व्यासं विभागं श्रुत्वा सर्वैः पापैः प्रमुच्यते ॥ ५९ ॥

अथाप्य संहितां स्वां मांडकेयसुतं ऋषिं कविं ॥ तस्य शिष्यो देवमित्रः सौनर्यादिभ्य ऊचिवान् ॥ ५५ ॥ शाकल्यस्तत्सुतः स्वां तु पंचधाप्य स्वसंहितां वात्स्यमुद्गलशालीयगोखल्यशिशिरेष्वधात् ॥ ५६ ॥ जातूकर्ण्यश्च तच्छिष्यः सनिरुक्तां स्वसंहितां शालाकपैजपैतालविरजेभ्यो ददौ मुनिः ॥ ५७ ॥ बाष्कलिः प्रातिशाख्येभ्यो वालखिल्याख्यसंहितां चक्रे पैलाय निर्भज्य काशारश्चैव तां दधुः ॥ ५८ ॥ बह्वृचः संहिता ह्येता एभिर्ब्रह्मर्षिभिर्धृताः श्रुत्वैतच्छंदसां व्यासं सर्वपापैः प्रमुच्यते ॥ ५९ ॥ वैशंपायनशिष्या वै चरकाध्वर्यवोऽभवन् ॥ ये चेरुर्ब्रह्महत्यांहःक्षपणं स्वगुरोर्व्रतं ॥ ६० ॥ याज्ञवल्क्यश्च तच्छिष्य आहाहो भगवन् कियत् ॥ चरितेनाल्पसाराणां चरिष्येऽहं सुदुश्चरं ॥ ६१ ॥ इत्युक्तो गुरुरप्याह कुपितो याह्यलं त्वया ॥ विप्रावमंत्रा शिष्येण मदधीतं त्यजौति ॥ ६२ ॥

श्वि

अथ तैत्तिरीयशाखोत्पत्तिं प्रस्तौति ॥ वैशंपायनशिष्या इति ॥ चरकाध्वर्यवः अध्वर्युशाखाध्ययनादध्वर्यवश्चरकाश्चासन् ॥ तत्र चरकशब्दं निर्वक्ति ये चेरुरिति ॥ ब्रह्महत्यारूपमंहः पापं क्षपयतीति तथा तत् स्वगुरोरनुष्ठेयं व्रतं ये चेरुः ॥ व्रतचरणात् चरकसंज्ञाश्चाभवन् ६० ॥ तच्छिष्यः वैशंपायनशिष्यः याज्ञवल्क्यः अयं पूर्वोक्तादन्यः आह गुरुं प्रतिशेषः ॥ उक्तिमेवाह अहो इत्यादिना सुदुःकरं इत्यंतेन हे भगवन् अहो ऽल्पसाराणामल्पतपसामेतेषां चरितेन कियदहं सुदुष्करं व्रतं चरिष्यामीति ६१ इत्युक्ते इति ॥ विप्रावमंत्रा विप्रावमानकर्त्री हेतुगर्भमिदं ॥ शिष्येण याज्ञवल्क्येनेतीत्थमुक्तः कुपितो गुरुरप्याह ॥ किमिति त्वया ऽलं योहि मदधीतं मत्तोधीतमाशु त्यजेति ६२ ॥

इत्यर्थः ५ याज्ञवल्कइति ४

चातुर्विध्यमेवाह ऋगिति ॥ ४ ॥ ऋगादीनां राशीन्समूहान्स्यात्कृतेति शेषः वर्गशः ॥ प्रकरणभेदेन राशिस्थं पृथक्सत्यं व्यत्यस्तः संहिताश्चक्रे राशेः ऋगादे
तिग्रांगः सुगमः दृष्टांतेन तथा रवर्गेतत् यथानेकविधमणिराशेर्मणिगणानुत्तदधृस्मात् कुर्वंति तद्वत् ४९ अथ तासां संहितानां चतसृणां मध्ये एकैकां
संहितां चतुरः शिष्यानुपाहूय तेभ्य एकैकस्मै महामतिर्याज्ञवल्क्यः दत्तेनोपदिष्टवान् ॥ ५० ॥ कस्मै कस्मै कां ददावित्यत आह पैलायेति द्वाभ्यां ॥ अनेककर्तृकत्वा
णाद्यरूपत्वाद्बह्वृचाख्यां ॥ तेषां मन्त्रार्थवशेन पादव्यवस्थेति ऋग्लक्षणं तेषां मंत्रब्राह्मणात्मकवेदैकदेशरूपाणां मध्ये मंत्रेषु मंत्रेष्वर्थभेदेन वि
शिष्टैकार्थप्रतिपादकत्वेऽप्यवांतरार्थभेदवशात्पादव्यवस्था सा ऋगिति तदर्थः यजुर्गणं सुनिरां गद्यमानत्वान्निगदाख्यत्वं यद्यपि ऋक्त्वाम
न्नामन्यद्यस्त्रप्लिष्टपठितं मंत्रजातं तदेव यजुस्तथा च सूत्रितं शेषे यजुः शब्द इति ॥ उच्चैरृचा क्रियते उपांशु यजुषेति यजुषमुपांशुपाठस्य वध्माव ।

दशे

ऋगथर्वयजुःसाम्नां राशीनुद्धृत्य वर्गशः ॥ चतस्रः संहिताश्चक्रे मंत्रैर्मणिगणानिव ॥ ४९ ॥ तासां स चतुरः शिष्यानुपाहूय महामतिः ॥ एकै
कां संहितां ब्रह्मन्नेकैकस्मै ददौ विभुः ॥ ५० ॥ पैलाय संहितामाद्यां बह्वृचाख्यामुवाच ह ॥ वैशंपायनसंज्ञाय निगदाख्यं यजुर्गणं ॥ ५१ ॥ सा
म्नां जैमिनये प्राह तथा छंदोगसंहितां ॥ अथर्वांगिरसं नाम स्वशिष्याय सुमंतवे ॥ ५२ ॥ पैलः स्वां संहितामूचे इंद्रप्रमितये मुनिः ॥ बाष्कला
य च सोऽप्याह शिष्येभ्यः संहितां स्वकां ॥ ५३ ॥ चतुर्धा व्यस्य बोध्याय याज्ञवल्क्याय भार्गव ॥ पराशरायाग्निमित्रे इंद्रप्रमितिरात्मवान् ॥ ५४ ॥

णान्निगदाख्यसंज्ञाविरोधस्तथापि निगदत्वमत्र न यजुषः लक्षणमुच्यते ॥ किंतु यजुःसंज्ञेष्वेकेषु चिन्मंत्रेषु परसंबोधनरूपेषु प्रोक्षणीरासादयेत्ये
वमादिषु परसंबोधनाय नितरां गद्यतेऽत्युत्पत्त्या वाचनिको पांशुत्वबाधेन तदर्थं उच्चैर्निगमे योगरूढः ॥ ५१ ॥ साम्नामिति यत्र गीत्या धारभूता
ऋचः सामत्वेनोपदिष्टाः गीतिषु सामेति मात्रं तस्य सामत्वं तत्र गानसाम्नां संबंधिनीं छंदोगसंहितां छंदोगाख्यां संहितां जैमिनये प्राह ॥ अथर्वांगि
रसं नाम अथर्वांगिरसाख्यां सुमंतवे ॥ ५२ ॥ पैलादयोऽपि स्वस्वशाखां स्वशिष्येभ्यः प्रोचुरित्याह पैल इति स्वसंहितां बह्वृचाख्यां द्विधा विभज्य स्वपुत्रायेंद्रप्रमि
तये शिष्याय बाष्कलाय चोचे स च बाष्कलोऽपि स्वकां संहितां ॥ ५३ ॥ चतुर्धा व्यस्य विभज्य हे भार्गव बोध्यादिभ्यः चतुर्भ्य आह आत्मवान् धीमानिंद्रप्र
मितिरपि ॥ ५४ ॥

व २

स०स्ता० टी०
२४ जि०

यदुहवावेति प्रसिद्धिद्योतको निपातसमुदायः ॥ य त्मंडलमधस्तपति तत्स्वधीमही । तेसंबंध ॥ स्वधीमहि सुष्ठुध्यायेमेत्यर्थः ॥ हे विबुधर्षे
त्रहे सवितः हेतपनेति त्रीणि संबोधनानि ॥ मंडलं विशिनष्टि अन्वहरहरनुसवनं त्रिसंध्यमाम्नायविधिनावैदिकमार्गेणउपतिष्ठ
मानानां जनानां याखिलानि दुरितानि पापानि तृणानि तृणमूलानि दुःखानि चतान्येतद्बीजानि ॥ यद्वादुरितानां बीजमईनं भर्जयती तिभर्जनं त
द्गर्गः तेजोयस्यतत् ॥ ६७ ॥ अथद्वत्तीयपादार्थः सर्वधीप्रचोदयित्त्वकथनेनस्तौति ॥ यदुहवावेति पूर्ववत् पोभवान्निजनिकेतनानां स्वश
रीराणां स्थावरजंगमसमूहानां मनइंद्रियप्राणगणानामात्मनो जीवांश्च स्वयमात्माधार ॥ कोंतर्यामीच सन्प्रचोदयति ॥ ६८ ॥ चतुर्विधपुरुषार्थे

यदुहवाव विबुधर्षभसवितरधस्तपत्यनुसवनमन्वहराम्नायविधिनोपतिष्ठमानानामखिलदुरितवृजिनबीजावभर्जनं भगवतः स्वधीमहित
पनमंडलं ॥ ६७ ॥ यदुहवाव स्थिरचरनिकराणां निजनिकेतनानां इंद्रियासुगणानात्मनः स्वयमात्मांतर्यामी प्रचोदयति ॥ ६८ ॥ य एवेमं लोक
मितिकरालवदनांधकारसंज्ञाजगरग्रहगिलितं मृतकमिव विचेतनमवलोक्यानुकंपयापरमकारुणिक ईक्षयैवोत्थाप्याहरहरनुसवनं
श्रेयसि स्वधर्माख्यात्मावस्थाने प्रवर्त्तयत्यवनिपतिरिवासाधूनां भयमुदीरयन्नटति परित आशापालैस्तत्रतत्र कमलकोशांजलिभिरुपहृ
तार्हणः ॥ ६९ ॥ अथह नावंस्तव चरणनलिनयुगलं त्रिभुवनगुरुभिर्वंदितमहमयातयामयजुः काम उ ॥

हत्वमाविः कुर्वन्स्वात्मनि प्रेतं निवेदयति ॥ य एवेति ॥ अतिकरालवदनो योंधकारसंज्ञो जगरस्तेन गृहीतं गिलितमतएव मृतकं इवाचेतनं निः
संज्ञं इमं लोकमवलोक्यानितरसाधारणया दृष्ट्यापादष्ट्या उत्थाप्याहरहस्त्रिसंध्यं स्वधर्माख्यावस्थाने स्वधर्मात्मकं स्वाराधनधर्मोस्वंयद्वात्माव
स्थानं चित्तसमाधानं तस्मिन्श्रेयसि प्रवर्त्तयिष्यतियश्च भगवान् ॥ अवनीपतिरिवानिमिषाणां देवानामधिपतिरसाधूनां दुष्टसत्वानां भयमुदी
रयन्नुत्थापयन्नटति ॥ पश्चपरित आशापालैर्दिक्पालैः ॥ कथं भूतैः कमलकोशांजलिभिः कमलकोशाकारैरंजलिभिरुपहृतं समर्पितम
र्हणं यस्य सः ॥ अटतीति पूर्वेणान्वयः ॥ ६९ ॥ अथ पद्भ्यां नु खलु हे भगवंस्त्रिभुवनगुरुभिर्ब्रह्मादिभिरभिवंदितं तवोक्तविधस्य पदकमलयुग
लमहं मया तयामयजुः काम अयातयामन्यन्ये यथावद्विज्ञातानान्युगतसाराणि वा यजूंषि कामयमान उपसरामि भजामीत्युपतस्थे ॥

श्री०
सु० पं०

अथ देवरातसुतो याज्ञवल्क्यः यजुषां गणं छर्दितो जीर्यगतः ॥ अथ मुनयः छर्दितानामादानं विप्ररूपेणानुचितं इति मत्वानाः ६३ तित्तिरत्वमपद्य
विशेषाः भूत्वा तत्तदा लोलुपतयाऽऽदधुः जगृहुः ॥ अतो यजुःशाखाः तैत्तिरीयसंज्ञा आसन् सुपेशलाः अतिरम्याः ॥ बहुवचनमवांतरभेदविव
क्षया ६४ ॥ का एव माध्यंदिनशाखा प्रवृत्तिं प्रस्तौति याज्ञवल्क्य इत्यादिना ॥ हे ब्रह्मन् गुरोरधीतानि छंदांसि अधिगवेषयन्नप्यपरूपं छर्दितवानिति
भावः ॥ अर्कं मादित्यमंडलोत्तवर्तिनमीश्वरं उपतस्थे तुष्टाव ६५ ॥ स्तुतिमेवाह ॐ नम इत्यादिना यो लोकयात्रामनुवहति तस्मै भगवते अ
दित्याय तुभ्यं नमः इति संबंधः तदेव दर्शयति ॥ अखिलेत्यादिनो अखिल जगदात्मनेऽवप्रपंचयं चतुर्विधभूतनिकायानां देवमनु

देवरातसुतः सोपि छर्दित्वा यजुषां गणं ॥ ततो गतोथ मुनयो ददृशुस्तान्यजुर्गणान् ॥ ६३ ॥ यजूंषि तित्तिरी भूत्वा तद्धोलुपतयाददुः तैत्तरी
याइति यजुःशाखा आसन् सुपेशलाः ॥ ६४ ॥ याज्ञवल्क्यस्ततो ब्रह्मन् छंदांस्यधिगवेषयन् ॥ गुरोरविद्यमानानि उपतस्थेर्कमीश्वरं ॥ ६५ ॥ या
ज्ञवल्क्य उ० ॐ नमो भगवते आदित्यायाखिलजगतामात्मस्वरूपेण कालस्वरूपेण चतुर्विधभूतनिकायानां ब्रह्मादिस्तंबपर्यंतानां
मंतर्हृदयेषु बहिरपि चाकाश इवोपाधिनाव्यवधीयमानो भगवानेक एव क्षणलवनिमेषावयवोपचितसंवत्सरगणेन तोयादान
विसर्गाभ्यामिमां लोकयात्रामनुवहति ॥ ६६ ॥

ष्वपशुपादपनेदेन जरायुजांडजस्वेदजोद्भिजरूपेण वा चतुर्विधानां भूतसमुदायानां किं बहुना ब्रह्मादिस्तंबपर्यंतानामंतर्हृदयेषा
काशइव व्याप्य उपाधिना ब्रह्मादिस्तंबपर्यंतेनाव्यवधीयमनं अनपोह्यमान असंसृष्ट व्याप्य तद्दोष इत्यर्थः कालरूपतां प्रपंचय
ति वहिः क्षणादिनिरवयवैरूपाचतेन संवत्सरगणेन तोयादान विसर्गाभ्यामिमां लोकयात्रां लोकवृत्तिमनुवहति निर्वहति ६६ अखि
लजगदात्मस्वरूपेणेत्यनेनांतः प्रविश्य प्रेरकत्वरूपो गायत्री प्रथमपादस्य सवितृशब्दार्थ उक्तः अथ द्वितीयपादस्य भर्गशब्दार्थवर्ण
नेन ॥

ति

ना

कृतौनामहिरण्यनाभस्य शिष्यः स च स्वशिष्येभ्यश्चतुर्विंशतिसंहिताः ऊचे शेषा अन्या अपि या प्रसिद्धाः ता आवंत्यः स्वशिष्येभ्य ऊचे ॥ ८० ॥ इति द्वादशे षष्टः ॥ ६ ॥ ॥ अथ क्रमप्राप्तमथर्ववेदादिविभागमाह अथर्वविदित्यादिना शिष्यं कबंधनामानं स्वकां संहितामध्यापयत् दर्शाय तथा पथ्याय दत्तवानिति न वेददर्शा ॥ १ ॥ स्वसंहितां चतुर्धा विभज्य शौल्कायन्यादीश्चतुरोध्यापयामास पथ्यस्तु त्रिधा विभज्य त्रीनित्याह सार्धेन शौल्कायनिरिति हे ब्रह्मन् ॥ २ ॥ तत्र बभ्रुनामकेन द्विधा विभक्तां स्वसंहितां ततो बभ्रुसैंधवायनावधीतवंतौ इत्याह ॥ बभ्रुरिति ॥ बभ्रुः सैंधवायनश्चांगिरसगोत्रश्च नवःशौनकशिष्यावित्यर्थः सावर्ण्याद्याः सैंधवायनबभ्रोः शिष्याः ॥ ३ ॥ आद्यशब्दविव

कृतो हिरण्यनाभस्य चतुर्विंशतिसंहिताः शिष्य ऊचे स्वशिष्येभ्यः शेषा आवंत्य आत्मवान् ॥ ८० ॥ ॥ इति श्रीमद्भा॰ द्वादशस्कंधे वेदशाखाविभागो नाम षष्ठोध्यायः ॥ ६ ॥ ॥ सूत उवाच ॥ अथर्ववित्सुमंतुश्च शिष्यमध्यापयत्स्वकां संहितां सोपि पथ्याय वेददर्शाय चोक्तवान् ॥ १ ॥ शौल्कायनिर्ब्रह्मबलिर्मोदोषः पिप्पलायनः वेददर्शस्य शिष्यास्ते पथ्यशिष्यानथो शृणु कुमुदः शुनको ब्रह्मन् जाजलिश्चाप्यथर्ववित् ॥ २ ॥ बभ्रुः शिष्योथांगिरसः सैंधवायन एव च अधीयेतां संहिते द्वे सावर्ण्याद्यास्तथापरे ॥ ३ ॥ नक्षत्रकल्पः शांतिश्च कश्यपांगिरसादयः एते आथर्वणाचार्याः शृणु पौराणिकान्मुने ॥ ४ ॥ त्रय्यारुणिः कश्यपश्च सावर्णिरकृतव्रणः ॥ वैशंपायनहारीतौ षड्वै पौराणिका इमे ॥ ५ ॥

१२

क्षितमाह नक्षत्रकल्प इति नक्षत्रकल्पः शान्तिश्च नक्षत्रकल्पः शांतिकश्चेति द्वौ तदुक्तं नक्षत्रकल्पो वेदश्च शांतिकल्पस्तथैव चेति काश्यपाद्या आंगिरसास्तदाद्या वा एतेन नक्षत्रकल्पादीनां कर्तृत्वात्तन्नाम्ना निरुच्यंते आथर्वणाचार्या अथर्ववेदशाखाविभागजनेन तत्प्रवर्तका इत्यर्थः इत्थं वेदसंहिताविभागमभिधायाथ पुराणसंहिताप्रपंचशुश्रूषामालक्ष्य तावत्तत्प्रवर्तकान्श्रोतुं प्रचोदयति शृणु पौराणिकानिति हे मुने ॥ ४ ॥ के पुनस्ते इत्यत्राह ॥ त्रय्यारुण इति त्रय्यारुणश्चेति छेदः इमे षट् ॥ ५ ॥

एवमिति स्तुतः प्रसादितश्च हरिर्गदितशरीरकः ॥ भगवान्वाजिरूपधरोऽश्वरूपधरः मुनये याज्ञवल्क्याय यादाउपदिदेश ॥७१॥ यजुर्भिरिति विष्णुर्वा
ज्ञवल्क्यः शतैरपरिमितैः यजुर्भिर्दशपंचपंचदशशताशाखाश्चकरोत् स तैरितिपाठे स विष्णुस्तैर्वाजिरूपेण हरिणा दत्तैर्यजुर्भिरकरोत्तैर्वा
जिनामसंज्ञास्ताः सम्यग्याज्ञवल्क्येन निर्मिताः शाखास्तताः काण्वामाध्यंदिनाश्च जगृहुरधीतवंतः ॥७२॥ जैमिनेः साम्नां विभागमाह जैमिने
रिति सामगास्य जैमिनेर्मुनेस्तनयः सुमंतुर्नामासीत्तत्सुतः सुमंतुसुतः सुत्वांस्ताभ्यां पुत्रपौत्राभ्यां चतुर्थ्यंतमिदं द्वेधा विभक्त्यैकैकां प्राहेत्य
र्थः ॥७३॥ तस्य जैमिनेः शिष्यमहान् माहात्म्ययुक्तः सुकर्मा नाम सामवेद एव तरुस्तस्मात्साम्नां सहस्रसंहितानां शाखानां भेदं चक्रे हे द्विजः ॥७४॥ हिरण्यना

सूत उ ॥ एवं स्तुतः स भगवान्वाजिरूपधरो हरिः । यजूंष्ययातयामानि मुनयेऽदात्प्रसादितः ॥७१॥ यजुर्भिरकरोच्छाखा दश पंच
शतैर्विभुः ॥ जगृहुर्वाजिसंज्ञास्ताः काण्वमाध्यंदिनादयः ॥७२॥ जैमिनेः सामगस्यासीत्सुमंतुस्तनयो मुनिः । सुत्वांस्तत्सुतस्ताभ्या
मेकैकां प्राह संहिता ॥७३॥ सुकर्मा चापि तच्छिष्यः सामवेदतरोर्महान् । सहस्रसंहिताभेदं चक्रे साम्नां ततो द्विजाः ॥७४॥ हिरण्यनाभः
कौशल्यः पौष्पिंजश्च सुकर्मणः । शिष्यौ जगृहतुश्चान्यश्चावंत्यो ब्रह्मवित्तमः ॥७५॥ उदीच्याः सामगाः शिष्याश्चास पंचशतानि
वै पौष्पिंजावंत्ययोश्चापि तांश्चोदीच्यान्प्रचक्षते ॥७६॥ लोकाक्षिर्लांगलिः कुशीदः कुक्षिरेव च । पौष्पिंजशिष्या जगृहुः संहितास्ते
शतं शतं ॥७७॥

शाल्य इति हिरण्यनाभविशेषणं पौष्पिंजोऽनामैकः तौ सुकर्मणः शिष्यौ जगृहतुः तथान्यश्चावंत्यश्चान्यस्तस्यैव शिष्यः स च ब्रह्मवित्तमः सोऽपि ज
गृहे इत्यर्थः ॥७५॥ उदीच्या इति पौष्पिंजावंत्ययोश्चापि अपिशब्दाद्धिरण्यनाभस्यापि पंचशतानि शिष्याश्चासन् तांश्चोदीच्यान्सतः तांश्च प्रा
च्यांश्च प्रचक्षत इत्यर्थः । यथोक्तं वैष्णवे उदीच्याः सामगाः शिष्यास्तस्य पंचशतं स्मृताः । हिरण्यनाभाच्चावंत्यः संहितां वै द्विजोत्तमैः गृहीता
स्तेऽपि चोच्यंते पंडितैः प्राच्यसामगा इति ॥७६॥ पुनरप्येतेषांत्रयाणां सुकर्मणः शिष्याणां शिष्यांतरैः शाखाबाहुल्यं दर्शयति लोकाक्षि
रित्यादिना । लोकाक्ष्यादयश्चत्वारः पौष्पिंजशिष्याः शतं शतं संहिताः जगृहुरित्यर्थः ॥७७॥

विसर्गं निरूपयति पुरुषानुगृहीतानामिति ॥ पुरुषेण परमपुरुषेणानुगृहीतानां माहितसृष्टिसामर्थ्यानां एतेषां महदादीनां य:
तत्वानां समाहार: संघातपरिणाम: स विसर्ग इत्यर्थ: ॥ कोसौ समाहार इत्यत स्तं दर्शयति चराचरमिति चराचरात्मकं जगदेव तत्समाहार इ
त्यर्थ: तत्र दृष्टांत: वीजाद्बीजमिति कारण ॥ २ ॥ बीजात्कार्यं बीजमिव कारणरूपात् कृतात्महदादिक्रमेण चराचरात्मकं यत्कार्यजातं स
विसर्ग इत्यर्थ: वृत्तिं निरूपयति वृत्तिरिति ॥ १३ ॥ विसर्गस्य जीवकर्मवासनाप्रयुक्तत्वाद्यत्वा वृत्तिं निरूपयतिरिति चराणां भूतानां चराणि
भूतानि वृत्तिजीवनोपाय इत्यर्थ: ॥ सा च विशेषेण स्वेन कृता सा च नृणां कामाद्रागात्प्राप्ता चोदनया विधिना न केवलं रागप्राप्ता शास्त्राविरु
द्धा चेत्यर्थ: कृता स्वेनेति पाठे स्वेन स्वभावेन कृतेत्यर्थ: ॥ १४ ॥ अथ रक्षामाह रक्षेति ॥ प्रतियुगं तिर्यगादिषु अच्युतस्यावतारस्तच्चेष्टा विश्वस्य

पुरुषानुगृहीतानामेतेषां वासनामय: विसर्गोयं समाहारो बीजाद्बीजं चराचरं ॥ १३ ॥ वृत्तिर्भूतानि भूतानां चराणामच
राणि च कृता स्वेन नृणां सा च कामाच्चोदनयापि वा ॥ १४ ॥ रक्षाच्युतावतारेहा विश्वस्यानु युगे युगे ॥ तिर्यङ्मर्त्यर्षिदेवेषु ह
न्यंते यैस्त्रयीद्विष: ॥ १५ ॥ मन्वंतरं मनुर्देवा मनुपुत्रा: सुरेश्वरा: ऋषयोंशावताराश्च हरे: षड्विधमुच्यते ॥ १६ ॥ राज्ञां ब्रह्मप्र
सूतानां वंशस्त्रैकालिकोन्वय: वंशानुचरितं तेषां वृत्तं वंशधराश्च ये ॥ १७ ॥ नैमित्तिक: प्राकृतिको नित्य आत्यंतिको लय: सं
स्थेति कविभि: प्रोक्ता चतुर्धास्य स्वभावत: ॥ १८ ॥

रक्षेत्यर्थ: अवतारतच्चेष्टितानां विश्वरक्षारूपत्वं दर्शयति हन्यंत इति येरव
तारस्तच्चेष्टितैस्त्रयीद्विष: वैदिकधर्मविरोधिन: हन्यंते ॥ १५ ॥ मन्वंतराणि लक्षयति मन्वंतरमिति षड्विधं मन्वंतरमुच्यते इति संबं
ध: मन्वादय: षडेते यत्र तन्मन्वंतरमुच्यते इत्यर्थ: षड्विधत्वमेवाह मनुरिति हरेरंशावतारश्चेति संबंध: ॥ सुरेश्वरा इंद्रा: ॥ १६ ॥ वंशमा
ह राज्ञामिति ब्रह्मणो मनो: प्रसूतानां राज्ञां य: त्रैकालिक: कालत्रयवर्ति अन्वय: स वंश इत्यर्थ: । तदनुचरितमेवाह वंशानुचरितमिति
ह ये च वंशधरा: वंशनिर्वाहिका ॥ तेषां वृत्तं वंशानुचरितमुच्यत इत्यर्थ: ॥ १७ ॥ संस्थामाह नैमित्तिक इति ॥ स्वभावत: कालकर्मस्वभावा
द स्य विश्वस्य चतुर्धा चतुर्विध: नैमित्तिकादिरूपो लय: संस्थेति कविभि: प्रोक्त: ॥ १८ ॥

त्पितुर्मुखादेकैकां संहितां पुराणसंहितामधीयंत ॥ ६ ॥ त्पितुर्मुखादित्यनेनत्ता बादरायणः षट् संहिता रोमहर्षणाय प्रोवाच तस्मा
द्वैपदधीयंत इति सूच्यते ॥ अहं तु एतेषां समस्तानां शिष्यो भूत्वा सर्वाः षडपि संहिता अध्यापनमधीतवानस्मि ॥ ७ ॥ किंच काश्यपइतिराम
स्य भार्गवस्य शिष्यो यो कृतव्रणः तएते चत्वारो वयं व्यासपुत्राच्छिष्यात् काश्च तस्मात् मूलसंहिता अधीमहि ॥ ८ ॥ मूलसंहिता इत्यनेन
पुराणसंहिता बाहुल्यं सूच्यते तत्र ग्रे सर्गे कस्मिन्नल्पावल्पु क्वचिद्विस्तृतसंवादे निरूपितमपि पुराणलक्षणं तद्वैरकथनाय देवीयु
त्ति पुराणं भ्यासहिता वेदशास्त्रानुसारेण निरूपितं पुराणलक्षणं बुद्धिमाश्रित्य शृणु अवहितमनाः शृणु इत्यर्थः ॥ ९ ॥ किं तदित्यत्राह सं

अधीयंत व्यासशिष्यात् संहितां मत्पितुर्मुखात् एकैकामहमेतेषां शिष्यः सर्वाः समध्यगां ॥ ७ ॥ काश्यपोहं च सावर्णी रामशिष्योऽ
कृतव्रणः अधीमहि व्यासशिष्यात् चत्वारो मूलसंहिताः ॥ ८ ॥ पुराणलक्षणं ब्रह्मन् ब्रह्मर्षिभिर्निरूपितं शृणुष्व बुद्धिमाश्रि
त्य वेदशास्त्रानुसारतः ॥ ९ ॥ सर्गोऽस्याथ विसर्गश्च वृत्तिरक्षांतराणि च वंशानुचरितं संस्था हेतुरपाश्रयः ॥ १० ॥ दशभिर्लक्षणैर्यु
क्तं पुराणं तद्विदो विदुः केचित् पंचविधं ब्रह्मन् महदल्पव्यवस्थया ॥ ११ ॥ अव्याकृतगुणक्षोभान्महतस्त्रिविधोऽहमः भूतसूक्ष्में
द्रियार्थानां संभवः सर्ग उच्यते ॥ १२ ॥

॥ भिः सर्गादिभिर्लक्षणैर्युक्तं नत्त्वपुराणं इति तद्विदः पुराणलक्षणविदः विदुः अत्रस्यानते
वृत्तिरक्षा शब्दाभ्यामुच्येते ॥ अंतराणि मन्वंतराणि वंशो वंश्यानुचरितं च संस्था निरोधः अनेनैवात्यंतिकप्रलयरूपा मुक्तिरप्युक्ता
हेतुशब्देनोतयः पृथग् गृहीताः ॥ केचिदिति हे ब्रह्मन् महदल्पव्यवस्थया केचित्पंचविधं च लक्षणं महापुराणस्यैतानि दशलक्षणानि अल्प
पुराणं तु सर्गश्च प्रतिसर्गश्च वंशो मन्वंतराणि च वंश्यानुचरितं चैव पुराणं पंचलक्षणं इत्युक्तं विधं इत्यर्थः ॥ १० ॥ ११ ॥ क्रमेण सर्गादीनां स्वरूपं
निरूपयति अव्याकृतेत्यादिना अव्याकृतस्य मूलप्रकृतेर्गुणानां सत्वरजस्तमसां क्षोभात् महान् गुणत्रयपरिणामरूपः तस्मादहंकारः
तथाभूतः तस्मात् भूतानां मात्राणां शब्दादीनां सूक्ष्माणां इंद्रियाणां चेत्यर्थानां वस्तूनां यः संभवः स सर्ग इत्युच्यते ॥ १२ ॥

मा॰ पु॰ टी॰
७

पंचभिर्वा लक्षणैर्लक्षणानि महांति स्वल्पकान्युपपुराणानि वा अष्टादश पुराणानि पुराविदः । अर्द्धकालाभिज्ञा मुनयो विदुः ॥ २३ ॥ कानि पुनस्तान्य-
ष्टादशेत्यत आह ॥ ब्राह्ममिति द्वाभ्यां ॥ २४ ॥ मात्स्यकौर्म्यं इति समाहारद्वंद्वः ॥ मात्स्यकौर्म्यं चेत्यर्थः ; इनीद्वयं त्रिषटमष्टादश ॥ २५ ॥ पुराणवेदसं-
हिताविभागोपपादनं निराम यतिब्रह्मन्निति हे ब्रह्मन् मुने वादरायणस्य शिष्याणां प्रशिष्याणां शाखाप्रणयने वेदपुराणसं । हितात्र-
वर्त्तनं तद्ब्रह्मोक्तेर्ब्राह्मणैः प्रवृत्ततेजसः ब्रह्मवर्चसिं दीपनमुद्दीपनं इति फलकीर्तनं ॥ इति द्वादशश्लोकसंग्रहो मोऽध्याय ॥ ७ ॥ पुराणगणनायां मार्कंडेयं इत्यु-
क्तं तत्र तत्पुराणकर्तुर्मार्कंडेयस्य चरित्रं शुश्रूषुस्तत्कथनायसूतं श्लोकतिर्शौनकः ॥ सूतेति हे सूत हे साधो हे वद तावत् चिरंजीविनो मम यं वद यद् यन्मे शुश्रूषितं तद्देसथं

स्य

एवं लक्षणलक्ष्याणि पुराणानि पुराविदः । मुनयोऽष्टादश प्राहुः क्षुल्लकानि महांति च ॥ २३ ॥ ब्राह्मं पाद्मं वैष्णवं च शैवं लैंगं सगारुडं । नारदीयं
भागवतमाग्नेयं स्कांदसंज्ञितं ॥ २४ ॥ भविष्यं ब्रह्मवैवर्तं मार्कंडेयं च वामनं वाराहं मात्स्यकौर्म्यं च ब्रह्मांडाख्यमिति त्रिषट् ॥ २५ ॥ ब्रह्म-
त्रिहं समाख्यातं शाखाप्रणयनं मुने ॥ शिष्यशिष्यप्रशिष्याणां ब्रह्मतेजोविदीपनं ॥ २६ ॥ इति सूजीव चिरं साधो वद नो वद तां वरः तमस्य पु-
रत्नमतां नृणां लंपारदर्शनः ॥ १ ॥ आकुस्थिरायुषमृषिं मृकंडुतनयं द्विजाः ॥ यः कल्पांते तु दकरितो येन ग्रस्तमिदं जगत् ॥ २ ॥ स वा अस्य कुलो-
त्पन्नः कल्पोऽस्मिन् भार्गवर्षभः ॥ नैवाधुना पि भूतानां संप्लवः कोऽपि जायते ॥ ३ ॥

एतस्य मपारे तमस्यज्ञानेतत्कार्ये संसारे वा मग्नतां नृणां न-
स्त्पारं दर्शयतीति पारम् तस्य मे वा नो वदेत्यर्थः ॥ १ ॥ किं तव शुश्रूषितमित्यत्र आहुरिति चिरायुषमेव दर्शयितुं विशिनष्टि यः कल्पांते
ऽप्यशिष्टः येन भगवत इदं जगत्ग्रस्तं तत्र दृष्टौ तिशेष ॥ यद्वा येनेदं जगत् कल्पांते ग्रस्तं तेनो वैरितो वशे षितो इय इति संबधः ; मार्कंडेय
स्य एतत्कल्पप्रसूतत्वे शास्त्रां तर विरोध परिहारो द्रष्टव्य ॥ एतत्कल्पप्रसूतो मार्कंडेयोऽन्यो वा स्यादित्य विरोधः ॥ तत्रोत्मनरसंज्ञा यस स्याप
यतिस वाइति हे भार्गवर्षभ ॥ स वै मार्कंडेयः अस्मिन्नेव कल्पे मत्कुलोत्पन्नः ॥ ततः किमतआह नैवेति अधुनापि भूतानां संप्लवः प्रल
यः कोऽपि नैँ जायते अस्मिन्नेव कल्पे जात ॥ कथमसंजातं संवर्तमद्राक्षीदिति संशय इत्यर्थः ॥ ३ ॥ ॥

व

राम॰
२७

हेतुं निरूपयति हेतुरिति ॥ अविद्याकर्मकारकः अज्ञानमूलकं पुण्यापुण्यात्मकं कर्म करोतीति तथा स जीवः एकत्वं जात्यभिप्रायं ॥ अस्य विश्वस्य
सर्गादेर्हेतुः ॥ जीवस्य कर्मफलानुभवार्थत्वात्सर्गादेस्तन्निमित्तत्वं तस्यातः स हेतुरित्यर्थः ॥ हेतुत्वख्यापनाय जीवं विशिनष्टि यमिति अनुशया-
नुरूपफलकर्मावशेषः ॥ सोऽस्यास्तीति तथाभूतं जीवं प्राहुः अनुक्तावशेषकर्मवासनाप्रयुक्तं प्राहुः ॥ उतापि तु चापरे एवमव्याकृतं देवादिनामरू-
परहितं प्राहुः सृष्टेः पूर्वं देवादिवासनारूपरहितं प्राहुः ॥ सृष्टेः पूर्वं देवादिनामरूपरहितवासनायुक्तो जीव अस्य सर्गादेर्निमित्तमिति स हेतु-
रित्यर्थः ॥ १९ ॥ अथोपाश्रयमाह द्वाभ्यां ॥ व्यतिरेकान्वयाविति मायामयेषु प्रकृतिकार्येषु शरीरेषु जाग्रदादिषु जीववृत्तिषु यस्यान्वयव्यतिरे-
कौ न ह्यलोपाश्रयः सर्वाधारत्वादपाश्रय इत्युच्यत इत्यर्थः ॥ अलणो जीववृत्तिनिर्वाहकतयावस्थानात् अस्यान्वयः ॥ अवस्थाभिरस्पृष्टत्वाद्व्य-

हेतुर्जीवोऽस्य सर्गादेरविद्याकर्मकारकः ॥ यं चानुशायिनं प्राहुरव्याकृतमुतापरे ॥ १९ ॥ व्य-
तिरेकान्वयो यस्य जाग्रत्स्वप्नसुषुप्तिषु । मायामयेषु तद्ब्रह्म जीववृत्तिष्वपाश्रयः ॥ २० ॥ प-
दार्थेषु यथा द्रव्यं तन्मात्रं रूपनामसु । बीजादिपंचतांतासु ह्यवस्थासु युतायुतं ॥ २१ ॥
विरमेत यदा चित्तं हित्वा वृत्तित्रयं स्वयं । योगेन वा तदात्मानं वेदेहाया निवर्त्तते ॥ २२ ॥

तिरेकश्च भवति ॥ ब्रह्मणः सच्चिदानन्दविशिष्टतारूपेण सर्वावस्थान्वयः स्वेन रूपेण तासां निर्व्यतिरेकश्चेत्युक्तं भवति ॥ २० ॥ अत्र दृष्टांतमाह प-
दार्थेष्विति ॥ बीजादिपंचतांतासु जन्मादिविनाशांतासु जन्मादिविनाशांतासु अवस्थासु रूपनामसु नामरूपवत्सु पदार्थेषु घटपटादिषु यद्द्र-
व्यं तन्मात्रं तद्द्रव्यमात्रं जन्माद्यवस्थानिर्युतायुतं तदन्याहि विशिष्टतारूपेण जन्मादियुतं तत्स्वरूपेण तदवस्थायां विशेष्यमात्ररूपेण ज-
न्मादिरहितं चेतद्वादित्यर्थः ॥ २१ ॥ यदुक्तं दशमस्य विशुद्ध्यर्थं नवानामिह लक्षणमिति तदाह ॥ विरमेतेति वृत्तित्रयपाश्रय इति आव प्रधानो नि-
र्देशः ॥ यदा चित्तं जाग्रदादिवृत्तित्रयाश्रयत्वं हित्वा स्वयमयत्नतः ॥ योगे वा योगाभ्यासबलेन वा विरमेत विषयेभ्य इति शेषः ॥ तदात्मानमाश्र-
यात्वं वेदात्मा चितं ततो निवर्त्तनेऽस्ति वेदांतरं तदात्मावं वेदमेनेईहायाः ॥ संसाररूपा या निवर्त्तत इत्यर्थः ॥ वेदेहाया निवर्तत इति पाठेऽस्य
चित्तं विरमेत सत्सात्मानं वदेत्यर्थः ॥ २२ ॥

इत्थमिति । योगेन ध्वस्ताः क्लेशा रागादयो यस्य तेनांतरात्मना प्रत्यगात्मना तेन मनसा धीरुजं ह्ययो ध्यातवान् ॥ १२ ॥ तस्येति । युंजतः समाहि-
तः सतः महान् भूयान् तदेवाह मन्वंतरषडात्मकः व्यतीयाय व्यतिक्रांतो भूत ॥ १३ ॥ तस्य तपोनिष्ठादार्ढ्यमिति हासेन वर्णयति एतदि-
ति पुरंदर इंद्रः एतच्च पश्चद्वर्णं ज्ञात्वा सम्प्रमेऽस्मिन्नन्वंतरे वैवस्वते हे ब्रह्मन्स्तपसा विघ्नं किमयं मत्पदं जिघृक्षतीति सशंकः प्राप्त । तद्वि-
घातनं तपोविघातमारब्धवान् ॥ १४ ॥ गंधर्वाश्चाप्सरसश्चता: मुनये मुनिं लंघयितुं गंधर्वादीन्प्रेषयामास स्मर्पं तथा रजस्तोकमहीरजस्तो मन-
कोलो न स्तस्य रजा गुणप्रभव वक्ष्याच चमहचतो चप्रेषयामास ॥ १५ ॥ ते वा इति । गंधर्वादयः हिमाचलस्योत्तरपार्श्वे तत्रापि यत्र पुष्पभद्रानदी चि-

इत्थं बृहद्व्रतधरस्तपःस्वाध्यायसंयमैः । दध्यावधोक्षजं योगी ध्वस्तक्लेशांतरात्मना ॥ १२ ॥ तस्यैवं युंजतश्चित्तं महायोगेन योगिनः । व्यतीयाय महा-
न्कालो मन्वंतरषडात्मकः ॥ १३ ॥ एतत्पुरंदरो ज्ञात्वा सम्प्रमेऽस्मिन्किलांतरे । तपोविश्रंकितो ब्रह्मन्नारेभे तद्विघातनं ॥ १४ ॥ गंधर्वाप्सरसः का-
मं वसंतमलयानिलौ । मुनये प्रेषयामास रजःस्तोकमदौ तथा ॥ १५ ॥ ते वै तदाश्रमं जग्मुर्हिमाद्रेः पार्श्व उत्तरे । पुष्पभद्रा नदी यत्र चित्राख्या
च शिला विभो ॥ १६ ॥ तदाश्रमपदं पुण्यं पुण्यद्रुमलतांचितं । पुण्यद्विजकुलाकीर्णं पुण्यामलजलाशयं ॥ १७ ॥ मत्तभ्रमरसंगीतं मत्तको-
किलकूजितं । मत्तबर्हिनटाटोपं मत्तद्विजकुलाकुलं ॥ १८ ॥ वायुः प्रविश्य आदाय हिमनिर्झरशीकरान् । सुमनोभिः परिष्वक्तो ववावुत्तंभयन्स्म-
रं ॥ १९ ॥

ला तत्र तदाश्रमं मार्कंडेयाश्रमं जग्मुः हे विभो ॥ १६ ॥ गत्वेति । तस्य मार्कंडेयस्याश्रमपदं प्रविष्टो वायुर्ववावितितृतीयेनान्वयः । आश्रमपदं विशि-
नष्टि पुण्यं पुण्यावहं पुण्यैर्द्रुमैर्लताभिश्चांचितं पूजितं आकुलमिति पाठांतरं पुण्यानां द्विजानां समूहैः कीर्णं कुलैः समूहै राकीर्णं तथा पु-
ण्या अमला आशया यस्मिंस्तत् ॥ १७ ॥ मधुपानमत्तानां भ्रमराणां संगीतं यस्मिन् मत्तकोकिलानां कूजितं यस्मिन् मत्तानां बर्हिणां मयूराणां एव न-
टास्तेषामाटोपः संभ्रमो यस्मिन् मत्तानां द्विजानां पक्षिणां कुलैराकुलं व्याप्तं ॥ १८ ॥ इत्थंभूतं तदाश्रमपदं मलयानिलः शीतलगिरिन-
दीसीकरानादाय सुमनोभिः कुसुमैः परिष्वक्तः स्मरं काममुत्तंभयन्नुद्दीपयन् ववौ प्रससार ॥ १९ ॥ एवं मलयानिलस्य व्यापारमुक्त्वा अथ
वसंतस्य तमाह ॥

र्व्यरित्वमेव प्रपंचयति । एक एवेति ॥ अर्णवे प्रलयार्णवे न्यग्रोधवटपत्रस्य पुटे तले शयानं तोकं बालकं पुरुषं ददर्श बालस्याल्पत्वसूचना
यतोऽकमित्युक्तमतो न पौनरुक्त्यं ॥४॥ इत्थं संशयमाविःकृत्य तन्निरासाय चोदयति एष इति एष । स बालकात्मकुलोत्पन्न इत्यादिनोक्तः यन्नः स
शयान् महत्कौतूहलं तच्छांतस्य श्रवणौत्सुक्यं भवति तं नोऽस्माकं संशयं छिंधि केवलं त्वं योगी किंतु पुराणेष्वपि ज्ञातत्वेन संगतः ५ इत्थमापृष्टस्त
च्चरित्रं विस्तरतो विवक्षुस्तावत्प्रश्नमभिनंदति सूत इति हे महर्षे त्वया कृतोऽयं प्रश्नः लोकस्य श्रममपहंतीति तथा तत्र हेतुः यत्र यस्मिन् प्रश्नोत्तरे क
लिमलं कलियुगप्रयुक्तं मलमपहंतीति तथाभूता नारायणकथा गीता तां श्रोष्यति ६ अथ हरिश्चरित्रं वर्णयति ब्राह्मेत्यादिना यावदध्यायसमाप्ति मा

एक एवार्णवे न्यास्यन् ददर्श पुरुषं किल । वटपत्रपुटे तोकं शयानं त्वेकमद्भुतं ॥४॥ एष नः संशयोऽत्यान्तं कौतूहलं यतः । तं न छिंधि महायोगी
पुराणेष्वपि संमतः ॥५॥ सूत उ० प्रश्नस्त्वया महर्षेऽयं कृतो लोकश्रमापहः ॥ नारायणकथा यत्र गीता ॥ कलिमलापहा ॥६॥ ब्राह्मद्विजातिसंस्का
रो मार्कंडेयः पितुः क्रमात् । वेदांस्त्वधीत्य धर्मेण तपःस्वाध्यायसंयुतः ॥७॥ बृहद्व्रतधरः शांतो जटिलो वल्कलांबरः । बिभ्रत्कमंडलुं दंडमुपवी
तसमेखलं ॥८॥ कृष्णाजिनं साक्षसूत्रं कुशांश्च नियमैर्युतः ॥ धारयन्नग्निगुरुविप्रात्मस्वर्चयन् संध्ययोर्हरिं ॥९॥ सायं प्रातः स्वगुरवे भैक्ष्यमाहृ
त्य वाग्यतः ॥ बुभुजे गुर्वनुज्ञातः सकृन्नो चेदुपोषितः ॥१०॥ एवं तपःस्वाध्यायपरो वर्षाणामयुतायुतं ॥ आराधयन् हृषीकेशं मृत्युं जिग्ये सुदुर्जयं ॥११॥

मार्कंडेयो मृत्युं विजिग्ये इति पंचकेनान्वयः ॥ क्रमात् गर्भाधानादिसंस्कारक्रमात् ब्राह्मः द्विजातिसंस्कारः उपनयनसंस्कारो येन सः धर्मेण शास्त्रोक्त
विधिना षडंगसहितान् वेदानधीत्य तपसा स्ववर्णाश्रमोचितेन स्वाध्यायेन वेदेन च संयुक्तः ॥७॥ बृहद्व्रतधरः नैष्ठिकब्रह्मचर्यव्रतधरः नियमैर्यमै
र्नियमस्य स्वधर्मस्य रुद्धिः वृद्धिस्तस्यै कमंडल्वादिकं बिभ्राणः ॥ संध्ययोः सायंप्रातः संध्ययोरग्न्यादिषु हरिमर्चयन् तत्रात्मा स्वहृदयं गु
र्वर्थं भैक्ष्यमाहृत्य तेनानुज्ञातः श्रौं बुभुजे सकृदेकवारं ॥ नो चेदननुज्ञातश्चेदुपोषितो भवति ॥८॥९॥१०॥ एवमिति सुदुर्जयं सुतरां दु ॥ जिग्ये
खेनापि जेतुमशक्यं मृत्युं जितवानित्यर्थः ॥११॥

तर्हि

हिबवत्स्नु धर्षितः । अलोभितोपि यदहमोहंकारस्य तावं विकारमोहं नागा इति तिनश्रापेत्येतन्महत्सु न चित्रं ॥ २९ ॥ दृष्ट्वेति । स्वराडिंद्रः । निस्तेजसं परि
म्लानवदनं कामं दृष्ट्वा ब्रह्मर्षेर्मार्कंडेयस्य प्रभावं श्रुत्वा च परं भृशं विस्मयमगात् ॥ २० ॥ तस्येति । नरनारायणः । नरसहितः श्रीनारायणः
लानि ॥ २१ ॥ तौ नरनारायणौ वीक्ष्य तत्थायेत्तुपरिष्ठात्संबंधः । कथंभूतौ शुक्लकृष्णौ नवकंजर । शुक्लः श्रीनारायणः कृष्णवर्णः रोमवक्रकृष्णा
जिनं वल्कलं च ते तन्मंबरे ययोस्तौ पवित्रे पाणौ ययोस्तौ त्रिवृत्त्रिगुणं नवतंतुकमिति वा तदुपवीतं कं द्वितीयां तावद्धाना विद्युत्परिष्ठा
संबंधः । ऋजुमवक्रं वेणवं दंडं ॥ २२ ॥ पद्माक्षमालां उत्तापि च जंतुमार्जनं मशकादिजंतपनोदकं वस्त्रं वेदं दर्भमुष्टिं च दधानौ । साक्षात्तप एवैं कंरू ५

इतीश्वानुचरैर्बलवद्धर्षितोपि महामुनिः । अन्यागाद्दहमो भावं नैतच्चित्रं महत्सु हि ॥ २९ ॥ दृष्ट्वा निस्तेजसं कामं सगणं भगवान्स्वराट् । श्रुत्वानुभा
वं ब्रह्मर्षेर्विस्मयं समगात्परं ॥ २० ॥ तस्यैवं युंजतश्चित्तं तपःस्वाध्यायसंयमैः । अनुग्रहायाविरासीन्नारायणो हरिः ॥ २१ ॥ तौ शुक्लकृष्ण
नवकंजलोचनौ चतुर्भुजौ रौरववल्कलांबरौ पवित्रपाणी उपवीतकं त्रिवृत्कमंडलुं दंडमृजुं च वैणवं ॥ २२ ॥ पद्माक्षमालामुत
जंतुमार्जनं वेदं च साक्षात्तप एव रूपिणौ । तपत्तडिद्वर्णपिशंगरोचिषा प्रांशू दधानौ विबुधर्षभार्चितौ ॥ २३ ॥ ते वै भगवतो रूपे नरना
रायणावृषी । दृष्ट्वोत्थायादरेणोच्चैर्ननामांगेन दंडवत् ॥ २४ ॥ स तत्संदर्शनानंदनिर्वृतात्मेंद्रियाशयः । हृष्टरोमाश्रुपूर्णाक्षो न सेहे तावु
दीक्षितुं ॥ २५ ॥ उत्थाय प्रांजलिः प्रह्व औत्सुक्यादाश्लिषन्निव । नमो नम इतीशानौ बभाषे गद्गदाक्षरः ॥ २६ ॥

मूर्तिरनयोरस्तीति तथा । तपत्तद्दीप्यमानं तडिद्वर्णसदृशं पिशंगं गौरं रोचिषा प्रांशू प्रगतावाप्राणांशौ वा ययोस्तौ विबुधश्रेष्ठैर्ब्रह्मादिभि
रर्चितौ ॥ २३ ॥ ते इति रूपे रूपाश्रयाः देहकनिर्देशा ॥ वी स्येति तच्चैर्महतांगेन देहेन ॥ २४ ॥ स मार्कंडेयस्तयोः संदर्शनेन यश्चानंदस्तेन निर्वृताः
सुखिताः आत्मा वाक् आत्मेंद्रियाशयाः देहेंद्रियमनांसि यस्य सः । हृष्टान्युल्लसितानि रोमाणि यस्य सः । तावतौ नरनारायणौ उद्वीक्षितुमपि
न सेहे न शशाक ॥ २५ ॥ उत्थायेति । प्रह्वः नम्रः । आश्लिषन्निव परिरंभमाण इव केवलं गद्गदाक्षरं नमो नम इति वाक्यं ईश्वरौ प्र
त्याबभाषे गद्गदाक्षरं इति क्रियाविशेषणं वा ॥ २६ ॥

उद्यद्दिति॥ उद्यच्चंद्रोयस्मिंस्तन्निशावक्त्रं रजनीमुखं यस्मिंस्तं प्रवालानां पल्लवानां स्तबकानां गुच्छानां स्तचालय॥ श्रोणयोयेपुवैः गोपद्रु
मलताजाले॥ गुप्यंते विटपैः सम्मिल्यंतेइति गोपाः द्रुमाः लताश्च तेषां जाले॥ समूहैरुपलक्षित॥ कुसुमाकरोवसंतः तत्र प्रादुर्भवन्नव
२०॥ अथ कामस्पत माह अन्वीयमानइति॥ गीतवादित्राणां मृदंगादीनां वृष्टे ये वा तैर्गंधर्वैरन्वीयमान॥ युज्यमानः गृहीतधनुर्बाणः
स्वर्गस्त्रीणां यूथस्यपतिः स्मरः काम अहरपतालस्यत॥२१॥ कुलेति उपासीनं तं मार्कंडेयं मूर्त्तिमन्तं तुम्बिगृहधारिणं अनिलमिव
स्थितं द्रष्टुं॥ ननु तुरिवितस्य मार्कंडेयस्य॥ अथोऽथवाद्यं स्तुतिसूचकं ध्वनिं चक्रुः॥२३॥ संदधइति पंचारविंदादीनि मुखानि यस्यतत्
दृष्टं स्वधनुषि संदधे॥ मधुर्वसंतः रजस्तोको लोनमदृश्य तिइंद्रभृत्याः व्यकंपयन्लास्तो नयन्॥२४॥ क्रीडंत्याइति॥ पुंजिकस्थलीना

उच्चंद्रनिशावक्त्रप्रवालस्तबकालिनि॥ गोपद्रुमलताजालेस्तत्रासीत्कुसुमाकर॥२०॥ अन्वीयमानो गंधर्वैर्गीतवादित्रयूथकै॥ अ
दृश्यतात्तचापेषुः स्वःस्त्रीयूथपतिः स्मर॥२१॥ हुत्वाग्निं समुपासीनं ददृशुः शक्रकिंकराः॥ मीलिताक्षं दुराधर्षं मूर्त्तिमंतमिवानलं
२२ ननृतुस्तस्य पुरत॥ स्त्रियोऽथो गायका जगु॥ मृदंगवीणापणवैर्वाद्यं चक्रुर्मनोरमं॥२३॥ संदधेऽस्त्रं स्वधनुषि कामः पंचमुखं तदा
॥मधुर्मनोरजःस्तोक इंद्रभृत्या व्यकंपयन्॥२४॥ क्रीडंत्याः पुंजिकस्थल्याः कंदुकैः स्तनगौरवात् भृशमुद्विग्नमध्यायाः केशवि
स्रंसितस्रजः॥२५॥ इतस्ततो भ्रमद्दृष्टेश्चलंत्या अनु कंदुकं वायुर्जहार तद्वासः सूक्ष्मं त्रुटितमेखलं॥२६॥ विससर्ज तदा बाणं मत्वा
तं स्वजितं स्मर॥ सर्वं तत्राभवन्मोघमनीशस्य यथोद्यम॥२७॥ त इत्थमपकुर्वंतो मुनेस्तत्तेजसा मुने॥ दह्यमाना निववृतुः प्रबोध्याहिमि
वार्भका॥२८॥

भावराः कंदुकैः क्रीडंत्याः स्तनभाराद्भृशमुद्विग्नमध्यायाश्च लग्नमध्यायाः केशेभ्यो विस्रंसिता स्रग्यस्यास्तस्याः॥२५॥ कंदुकमनुलक्ष्य इतस्त
तो भ्रमंत्यो दृष्टीयस्यास्त्वलंत्या चलंत्याः एवं त्रुटिता मेखला यस्मिंस्तत्सूक्ष्मं वासो वस्त्रं वायुर्जहार॥२६॥ विससर्जेति॥ तदा पुंजिकस्थल्यानग्न
दृष्ट्वा यांतं व्रतस्मिन्नु चोसर्वमेतत्कृतं मोघं व्यर्थमभवत्॥ यथानीशस्य निर्द्धनस्योद्यमस्तद्वत्॥२७॥ तइति हे मुने मुनेर्मुनयोऽइत्थमपकुर्वं
तस्तस्य मुनेस्तेजसा दह्यमाना॥ निववृतुर्निवृत्तावंतस्तु॥ यथाऽर्भको हिंसर्पं प्रबोध्य ततो निवर्त्तते तद्वत्॥२८॥ चित्रमेतद्दहोतस्याजेतेंद्रि
यत्वइति विस्मयमानमानमालस्याह॥ इतीति॥

यतः सर्वं जगत्कारणभूतो तस्मादेव कारणं तु प्पेयध्द्‌त्यादि द्विवेदार्थतात्पर्यज्ञा ध्यायंतीत्याह ॥ तस्येति ॥ तस्य सृष्टिसंहारकर्तुरखिलस्य स्थावरेशितुः चराचराणां मतः अखिलस्य धारणेन नियंतुश्च तवयत्पादमूलं तदेव जामीत्युपरिष्टात्संबंधः ॥ कथंभूतं यद्वैयथस्मात्तत्वडुपासनादित्यर्थः तत्कर्मगुणकालरजः स्पृशंति कर्मगुणकालानांरजोमलं यद्रुपासकान्न स्पृशंति ॥ रज इति पावेत थाहा कर्मादयो यद्रुपसकंन स्पृशंति ॥ यद्रुपासकः कर्मादीन्न स्पृशंतीति वा ॥ तत्र कर्मपुण्यपापात्मकं ॥ रज इति कर्मणोरजः रजोवर्जो नावारकत्वात्सु वद्रुः रवेगुणशब्देन रजआदिगुणकार्यं काम क्रोधादिकं विवक्षितं ॥ कालशब्देन तत्प्रयुक्तशीतातपवर्षादयः रुजोरोगाः ॥ किंच वेदहृदयाः वेदे हृदयेषां ते वेदतात्पर्यविद इत्यर्थः मु

तस्याखिलस्य स्थिरचरेशितुरंघ्रिमूलं यत्स्थं न कर्मगुणकालरजः स्पृशंति यद्वै स्तुवंति विनमंति यजंत्यभीक्ष्णं ध्यायंति वेदहृदया मुनयस्तदाप्त्यै ॥ ५१ ॥ नान्यं तवांघ्र्युपनयादपवर्गमूर्तेः क्षेमं जनस्य परितोभिय ईश विद्मः ब्रह्मा बिभेत्यलमतो द्विपरार्धधिष्ण्यः कालस्य ते किमुत तत्कृतभौतिकानां ॥ ५२ ॥

नयः यजंत्याराधयंति च ॥ किमर्थं तदाप्त्यै तत्पादमूलप्राप्त्यै ॥ ५१ ॥ किं तदाप्त्येत्यत आह ॥ तस्याएव निरतिशयपुरुषार्थरूपतामाह नान्यमिति ॥ अपवर्गमूर्तेः निरतिशयपुरुषार्थरूप हे ईश परितो नन्नो भियं यस्मात्तवदंघ्र्युपनयात्त्वदंघ्रिप्राप्तेरन्यं क्षेमं श्रेयो न विद्मः भियइति छेदे परितो भियइति समस्तं पदं जनस्य विशेषणं ॥ तनु चतुर्मुखलोकप्राप्तिरपि क्षेममेव त्यैत आह ब्रह्मा बिभेति ॥ अलं नितरां कालस्य कालरूपस्य ते तव ॥ बिभेति ॥ कुतः यतः सोपि द्विपरार्धधिष्ण्यः द्विपरार्धकालावस्थायिको लः अतो बिभेतीति संबंधः ॥ यतो ब्रह्मण एवं भयं किमुत तत्कृतानां तत्सृष्टानां भौतिकानां भूतपरिणामात्मकदेहभाजां ॥ ५२ ॥ यतस्त्वदंघ्र्युपनय एव क्षेमस्तव पादमूलमेव तत्प्राप्तये ॥

तयोरिति ॥ आधाय निधाय पादयोरवनिज्य पादौ प्रक्षाल्य अर्हणेन योग्येनानुलेपनेन चंदनेन धूपैर्माल्यैः कुसुमैश्चापूजयत ॥ २७ ॥ सुखं यथा त
थासीनो गरिष्ठो पूज्यतमोऽप्रतीदं वक्ष्यमाणमब्रवीत ॥ २८ ॥ न किमेवाह किमित्यादिना यावदध्यायसमाप्ति ॥ युवयोर्दर्शनं न मे तपः फलं तस्या
पि सर्वेंद्रियप्राणप्रचोदयित्रा त्वयैव कारितत्वादतः केवलं त्वत्कृपाफलमेवेत्यभिप्रेत्याह ॥ किं इति हे विभो न वत्ता किं वर्णये कथं स्तौमि य
तः स्वस्य ममत्तनुवृत्ता किं बहुना ॥ जरावेयोर्बलरूढयोश्वासुः प्राण ॥ यतो येन त्वयोदीरितः प्रेरितः संस्पंदते चलति स्वव्यापारस्ते मोत्तव
तिनं स्पंदमानं प्राणमनुसृत्य वागादीनि स्पंदंति ॥ अनुदात्तेत्त्वलक्षणस्यात्मनेपदस्यानित्यत्वात्परस्मैपदं ॥ यद्येवं तर्हि सर्वेऽपि त्वमिव किं न मामुपासते इ
त्यत्राह त्वमथापीति ॥ प्राणिमात्रस्य प्राणादिप्रचोदयितृत्वेऽपि भजतामुपासमेव न तावबंधुर्नाव स्वदुपासनरूपो भिप्राय विशेषः तं बध्नाति स्थिरीक

तयोरासनमाधाय पादयोरवनिज्य च ॥ अर्हणेनानुलेपेन धूपमाल्यैरपूजयत ॥ २७ ॥ सुखमासन आसीनो प्रसादाभिमुखो मुनिः ॥ युवराजस्यपा
हान्पां गरिष्ठा विदमब्रवीत ॥ २८ ॥ मां केंडे यन्तु ॥ किं वर्णये तव विभो यदुदीरितोसुः संस्पंदते तमनु वाङ्मनइंद्रियाणि स्पंदंति वैतनुभृतामज
र्वयोरप्यस्याप्यथापि भजतामसि भावबंधुः ॥ २९ ॥ मूर्तीइमे भगवतो भगवंस्त्रिलोक्याः ॥ क्षेमाय तापविरमाय च मृत्युजित्ये ॥ नानाबिभर्ष्यवितु म
न्यतनूर्यथेदं सृष्ट्वा पुनर्ग्रससि सर्वमिवार्णनाभिः ॥ ३० ॥ रोतीति तथा त्वयि किंचिदानुकूल्ययुक्तानां भेदनाव बंधुस्त्वमिति भावः ॥ २९ ॥ ननु प्राण
नो नाम हृदीपुषितेश्वर ॥ नाहमित्यत्र भगवदवतारमूर्तीनां प्रयोजनत्वबुवाङ्ग्यमभिप्रेत्य न त्ववतारप्रयोजनमाह ॥ मूर्तीइति हे भगवन् भगवतः षाड्गुण्यपूर्ण
स्यैव मे मूर्तिर्त्यवतारो किमर्थं त्रिलोक्याः क्षेमाय सुखाव तापविरमाय ज्ञानोपदेशेनाध्यात्मिकादितापविघाताय मृत्युजित्यै जयाय मो
क्षायेति यावत् ॥ अत्र दृष्टांतांतराला नाचहव ता राने वदृष्टांतयति नानाबिभर्षीति ॥ पद्यानाना विधान्यन्यतनूरामकृष्णादितनूः ॥ इदं जगद
वितुं रक्षितुं विभर्षि लहत ॥ न केवलं जगद्रक्षैव व्यापारः ॥ किंतु सृष्टिसंहारावपीत्याह सर्वं इदं जगत्सृष्ट्वा पुनर्ग्रससि ननु किं त्वयेक
स्यैव सृष्टं पुनर्विलयं क्वचिद्दृष्टं इत्यतो दृष्टांतमाह इवार्णनाभिरिति ॥ ऊर्णनाभिरिवेत्यर्थः ॥ ३० ॥

योजं ॥ तत्र सत्त्वशब्देन स्वसत्ता॰ सत्त्वं गुणसत्त्वाद्विलक्षणमित्युक्तं ॥ शुद्धसत्त्वमयं त्रिगुणात्मकप्रकृतिद्रव्यविलक्षणं विवक्षितं ॥ इत्थं यो
जनार्थमेव सत्त्वं रजस्तम इति व्य॰ नहीशः कृत ॥ प्रबंधोपक्रमेपि सत्त्वं रजस्तम इति प्रकृतेर्गुणास्तैर्युक्त ॥ परः पुरुष एक इहास्य धत्ते इत्यत्रायमे
वार्थः ॥ रजस्तमःशब्दाभ्यां सत्त्वमिश्रता विवक्षिता ॥ ४४ ॥ यतः सत्त्वमप्येवंप्रशांतत्वेन लक्ष्येत तस्मात्त्रिगुणाबद्धजयस्तामेव तु पासत इत्याह ॥ तस्माद्धिति
अर्थेनुहेतावस्तावकानां लक्षणानां स्वदृष्टितो स्वस्य तव चद ॥ ये तांश्रियांभुक्त्वा शुद्धसत्त्वमयीं तनुं तजंति का सो मुक्त्वा तनुरिति स्वयमाह ॥ पक्षान्तेतः
पुरुषरूपमनुशांति सत्त्वं लोके का इति सात्वता ॥ पंचरात्रसिद्धांततत्त्वाभिज्ञाः लोका ॥ जनायस्तु पुरुषरूपं पुरुषार्थकृत्वावस्थितरूपं पुरुषस्य त
वा रूपं वा सत्त्वं विशुद्धसत्त्वमनुशांति इत्युपास्यत्वेनेहुविसेव प्रमुल्कातनुरित्यर्थः ॥ तद्दिशिनष्टि यतः पुरुषरूपासत्त्वादुपास्यमानादभयं संसृति

तस्मात्त्वेह भगवन्नथ तावकानां शुक्लां तनुं स्वदयितां कुशला भजंति ॥ यत्सात्वताः पुरुषरूपमुशंति सत्त्वं लोको यतोऽ
भयमुतात्मसुखं न चान्यत् ॥ ४५ ॥ तस्मै नमो भगवते पुरुषाय भूम्ने विश्वाय विश्वगुरवे परदेवतायै ॥ नारायणाय ऋ
षये च नरोत्तमाय हंसाय संयतगिरे निगमेश्वराय ॥ ४६ ॥ ॥ श्री ॥

तया भावः उताथि चात्मसुखं आत्मानुभवसुखमनु चान्यद्न्यद्द्वयमिश्रसुखं नास्ति ॥ ४५ ॥ इत्थमनंतकल्याणगुणगणं त्वां स्तोतुमहं न शक्नोमी॰
त्यभिप्रेत्योपस्थितेषु गुणेविशिष्टं प्रणमति ॥ तस्मा इति ॥ पुरुषाय पुरुषाय पुरुषणेति ददाती तित था चतुर्विधपुरुषार्थप्रदायेत्यर्थः ॥ भूम्ने स
र्वोत्तरात्मत्वेन भूम्ना गुणविशिष्टाय ततएव विश्वाय विश्वरूपेणावस्थिताय ततएव विश्वगुरवे विश्वस्य हितकराय आत्मनः शरीरहितो चरणशी॰
लत्वादिति भावः ॥ परदेवतायै इत्यनेन ततोधिकदेवतांतरव्यावृत्तिः ॥ नारायणायेत्यनेन प्राप्यत्वं प्रापकत्वं धारकत्वं च विवक्षितं ॥ ऋषये इ
त्यनेन सर्वज्ञत्वं ॥ नारायण परइसमभिव्याहृत नरोत्तमशब्देन शिष्याचार्यरूपेण खिलाध्यात्मविद्याप्रवर्तनद्वारा जगदुज्जीवयितृत्वं विवक्षि
तं हंसायेत्यनेनाश्रितदोषनिराकर्तृत्वं संयतगिर इत्यनेन सर्वमिदमस्मात्तो नारद इत्यत्रेव परिपूर्णतापरमुक्तमजल्पाकत्वं ॥ निगमेश्वरायेत्य
नेनाखिलवेदाचार्यत्वं च विवक्षितं ॥ ४६ ॥

नजामीत्याहतवाइति ॥ कृतधियःसत्यसंकल्पस्यपरमात्मनोगुरोश्चपरस्यसर्वस्मात्परस्यचतवात्मद्दितंतदेतत्पादमूलंनजामि ॥ कृतधियश्च
तेनतेनामहंसमुद्धर्त्तामृत्युसंसारसागरादित्युक्तविधसत्यसंकल्पत्वंविवक्षितं ॥ आत्मगुरोरित्यनेनांतः ॥ अविरूपनियमनेनसाधुकर्मकारयि-
तृत्वंज्ञानोपदेशेनउपकर्तृत्वंचपरत्वंप्राप्यलोपयुक्ततयोक्तं ॥ हित्वेतदात्महितमात्म ॥ गुरोःपरस्यदेहाद्युपार्थमसदित्यनभिज्ञमात्रंइतिपाठेऽ
स्यंतमसदुष्टमेपार्थेनि ॥ फलंचदेहादिहित्वाऽपास्यात्महितंपादमूलंनजामीतिसंबंधः ॥ हित्वेदमात्मच्छिदिमात्मगुरोरितिपाठेवातमच्छिदिंज्ञाना-
वारकंदेहादिहित्वानजामीत्यर्थः ॥ देहाद्युपार्थमसदित्यनभिज्ञमात्रमितिचक्वचित्पाठः तदाऽपार्थमसदितिचनभवत्यनभिज्ञमात्रंयस्मात्दे-
हादिहित्वेत्यर्थः ॥ ज्ञानादृश्यार्थोऽस्य ॥ यद्येवंतत्वांशैर्योनजेत्तर्हिसएवसर्वमनीषितार्थमनिमतंसर्वपुरुषार्थंविंदेतअनेन ॥ अद्यपाठेतुयस्य
तिशेषःयस्यतेऽभिज्ञमात्रंत्वत्पादमूलविषयकज्ञानमात्रमस्तितर्हिसएवसर्वमनीषितार्थंविंदेत ॥ विंदंतितेसर्वमनीषितार्थंइतिच

तद्वैनजाम्कृतधियस्तवपादमूलंहित्वेतदात्महितमात्मगुरोःपरस्य ॥ देहाद्युपार्थमसदित्यनभिज्ञमात्रंविंदेततेतर्हिसर्वमनीषितार्थं ॥४३॥ सत्वंर-
जस्तमइतीशतवात्मबंधोमायाकृता ॥ स्थितिलयोद्भवहेतवोस्य ॥ लीलाधृतायदपिसत्वमयीप्रशांत्यैनान्येनृणांव्यसनमोहभियश्चयाभ्यां ॥४४

प्राबोऽध्यतेतदाऽनभिज्ञमात्रमित्यस्यायेषामित्यादि ॥ तेविंदंतिलभंतइतिसंबंधः ॥४३॥ ननुब्रह्मरुद्रावपिममैवमूर्तीअतस्तौहित्वामामेवकिमि-
तिभजसइत्यतआह ॥ सत्वमितिहेईशहेआत्मबंधोजीवसखयद्यपियद्यप्यस्यजगतःस्थितिलयोदयहेतव ॥ तवविष्णुरुद्रब्रह्मतनवःइतिवि-
शेष्यमध्याहर्त्तव्यं ॥ सुक्तंतनुमित्यग्रेदर्शनात्ताश्चसत्वरजस्तमइत्यातव मायातयैवकृता ॥ लीलाधृतालीलयाधृता ॥ लीलापदेनविष्ण्वाद्या-
त्मलतनुसंबंधस्यकर्ममूलत्वव्यावृत्तिः ॥ तथापितत्रसत्वमयीयातनुः ॥ सैवनृणामुपास्यमानानांशांत्यैमोक्षोपयुक्तशांतयेभवतिनान्येऽन्ये
ब्रह्मरुद्रौतन्वैनप्रशांत्यैभवतः ॥ प्रत्युतताभ्यांउपास्यमानाभ्यांमृत्युव्यसनमोहभियोभवेयुःव्यसनंदुःखंमोहोभयं यद्यप्यत्रस्थितिहेतुभूताया
विष्णोरव्यतनोरपिमायाकृतत्वोक्त्याप्रकृतिसत्वगुणपरिणामरूपत्वमवगम्यते ॥ नचसत्वादयोनसंतीशेयत्रचप्राकृतागुणाःइतिभगवद्-
गृहेप्रतिषिद्धंतथाप्यत्रसत्वमितियामायारजस्तमश्चेतिचयामायालाभ्यांकृता ॥ मायाभ्यामकृताइति ॥

तव बृहद्व्रतचर्यया नैष्ठिकब्रह्मचर्येण वयं परितुष्टाः स्मः । वयमिति बहुवचनं सर्वदेवाभिप्रायकं ॥ वरदानामीशानान्तताः वरं प्रतीच्छ गृहाण हि ते तुभ्यं भद्रं शुभमस्तु ३ इत्थं वरायप्रचोदित ॥ आह जितंतइति त्रिभिः हे देवदेवेश ब्रह्मोत स्यापीश । प्रपन्नानामार्तिक्लेशं हरतीति तथा हे अच्युत स्वाश्रितान्न च्यावयतीति तथा नोऽस्माकं नवा स्मप्यावद्रूपते तियदेतावत्तेव वरेणालं ४ तत्र हेतुः यत्पादवर्शनस्य दुर्लभतामाह वाञ्छन्तीति अजादयो ब्रह्मादयः योगपक्वेन योगेन तथापि तव मायाप्रपञ्चं किं द्रक्ष्ये द्रष्टुमिच्छामीत्यर्थः ॥ तां विशिनष्टि ययामायया लोकपाले ॥

वयं ते परितुष्टाः स्म त्वद्बृहद्व्रतचर्यया ॥ वरं प्रतीच्छ भद्रं ते वरदेशादभीप्सितं ३ ऋषिरु० ॥ जितं ते देवदेवेश प्रपन्नार्तिहराच्युत ॥ वरेणैतावतालं नो यद्भवान्समदृश्यत ४ ॥ वाञ्छन्त्यजाद्यो यस्य श्रीमत्पादाब्जदर्शनं ॥ मनसा योगपक्वेन स भवान्मेऽक्षगोचरः ५ ॥ अथाप्यम्बुजपत्राक्ष पुण्यश्लोकशिखामणे ॥ द्रक्ष्ये मायां यया लोकः सपालो वेद सद्भिदां ६ ॥ सूत उ० ॥ इतीडितोऽर्चितः काममृषिणा भगवान्मुने ॥ तथेति स स्मयन्प्रागाद्बदर्याश्रममीश्वरः ॥ ७ ॥ तमेव चिन्तयन्नर्थमृषिः स्वाश्रम एव सः ॥ वसन्नग्न्यर्कसोमाम्बुभूवायुवियदात्मसु ॥ ८ ॥ ध्यायन्सर्वत्र च हरिं भावद्रव्यैरपूजयत् ॥ क्वचित्पूजां विसस्मार प्रेमप्रसरसंप्लुतः ॥ ९ ॥ तस्यैकदा भृगुश्रेष्ठ पुष्पभद्रातटे मुनेः ॥ उपासीनस्य संध्यायां ब्रह्मन्वायुरभून्महान् ॥ १० ॥

चरः + ब्रह्मादिभिः सहितो लोको जनः सद्भिदां सद्वस्तुभेदं स्वेन त्वयि भिदां भेदं देवतिर्यङ्मनुष्यस्थावरभेदं वेद यया तां भिदां वेद तां मायामित्यर्थः ॥ ६ ॥ इतीति इत्थमीडितः स्तुतोऽर्चितश्च भगवान् हे मुने स्मयो मन्दहासस्तेन सहितं यथा तथा तथेति इष्यसि त्वमनुगच्छ बदर्याश्रमं प्रति प्रागात् ॥ ७ ॥ तमेवेति तमेवार्थं मायादर्शरूपमर्थं चिन्तयन् कदा द्रक्ष्यामीति चिन्तयन्नित्यर्थः ॥ अग्न्यादिषु ब्रह्मसु त्वात्मात्मसु द्रष्टव्यं ॥ ८ ॥ सर्वत्र गो विप्रादिषु हरिं ध्यायन् भावद्रव्यैर्मनोमयैर्द्रव्यैरपूजयत् मानसोपचारैरपूजयदित्यर्थः ॥ क्वचिदिति ॥ भक्तिप्रसरेण प्रीत्यात्मकभक्तिप्रवाहेण संप्लुतः व्याप्तः तां पूजामपि विस्मृतवान् ९ मायादर्शनमुपवर्णयति तस्येत्यादिना यावदध्यायसमाप्ति हे भृगुश्रेष्ठ तस्य मुनेर्माकंडेयस्य उपासीनस्य सतः हे ब्रह्मन्महान्वायुरभूत् ॥ १० ॥

ननु त्वं द्रष्टुमाङ्स्यं नूनं सर्वेऽपि किं न विंदंति तत्राह । यं वा इति । त्वन्मायया आवृता मतिर्यस्य अत एव वितथे निरर्थके रूपथे इंद्रियमार्गे ऽर्थं मंती धीर्यस्य सः देहात्माभिमानीत्यर्थः ॥ अमङ्गिरिति पाठे विषयग्रावणेपरत्वलङ्घिर्वितथा रूपथे यं त्वां न वेद । कथं नूनमपि स्वके घसुषु प्राणेषु हृदि हृदये हृत्कार्येषु विषयेषु विषयेषु नियंत्रृतया संतमपि तहि न कोऽपि वेदेत्यत्राह । यस्तावाखिलगुरोराद्यः प्रथमं त्वत्प्रवर्तितं त्वं वेव मुपसाद्य स्थितः इति शेषः । स एवं त्वां साक्षाद्देववेदांतविहितोपासनाविशुद्धमनसा वेदेत्यर्थः ॥ ४७ ॥ वेदे नैव ज्ञानमित्युपपादयन्नमति । यदिति । पस्पर्शोनोपाय ऽनूतो निगमो वेदः आत्मरहस्यप्रकाशकः ॥ अन्यथा दुर्ज्ञेयतामाह । अजपरइति । अजो ब्रह्मा परः उत्कृष्टः धानेयेषां ते ब्रह्ममुख्याः । कवयो यतंतः सांख्ययोग

यं वै न वेद वितथाक्षपथैर्भ्रमद्धीः संतं स्वकेष्वसुषु हृद्यपि दृक्पथेषु । तन्माययावृतमतिः स उ एव साक्षादाद्यस्तवाखिलगुरोरुपसाद्य वेदं ॥ ४७ ॥ यद्दर्शने निगम आत्मरहःप्रकाशो मुह्यंति यत्र कवयोऽजपरा यतंतः । तं सर्ववादविषयप्रतिरूपशीलं वंदे महापुरुषमात्मनिगूढबोधं ॥ ४८ ॥ इति श्रीमद्भागवते महापुराणे द्वादशस्कंधे मार्कंडेयस्य तत्र नारायणदर्शनं नामाष्टमोऽध्यायः ॥ ८ ॥ सूत उवाच ॥ संस्तुतो भगवानित्थं मार्कंडेयेन धीमता । नारायणो नरसखः प्रीत आह भृगूद्वहं ॥ १ ॥ श्रीनारायण उवाच । भो भो ब्रह्मर्षिवर्योऽसि सिद्ध आत्मसमाधिना । मयि भक्त्याऽनपायिन्या तपःस्वाध्यायसंयमैः ॥ २ ॥

हृद्यनिर्यतमाना अपि पद्महिरण्यगर्भकपिलादयः योगसांख्यादितं वक्ष्यमाणयनेन त्वत्स्वरूपविमर्शेनायतमाना अपि यत्र त्वद्विषये ते मुह्यंति । तमित्थंभूतं सर्ववादविषयप्रतिरूपशीलं सांख्यवादयोगसांख्यवादिवादाः प्रकृत्युपादानत्वपुरुषनिमित्तत्वादिवादास्तेषां प्रतिक्षेपकं रूपं शीलं स्वभावः सार्वज्ञसर्वशक्तित्वादि प्रकृतिपुरुषादिषु संभावितो यस्य तमात्मनि स्वैनं गूढस्तैरविज्ञातः बोधः अपरिच्छेद्यं ज्ञानं येन बोधस्यतं महापुरुषं वंदे ॥ ४८ ॥ इति द्वादशेऽष्टमः ॥ ॥ इत्थं संस्तुतस्तत् जिमतं प्राप्य छंदित्याह । संस्तुत इत्यादिना । हे भृगूद्वह द्वितीयांतपाठे भृगूद्वहं मार्कंडेयं प्रत्याह ॥ १ ॥ उक्तिमेवाह भो भो इति द्वाभ्यां आत्मसमाधिना चित्तैकाग्र्येण [illegible] अनपायिन्या अविच्छिन्नया मयि भक्त्या च न पश्यादि निमितः सिद्धो ऽसि

सि २

क्वचिदिति। तरलैस्तरंगैररम्यो ऽन्यघातिभिरन्योन्यं बुध्यब्धियोदोभिर्जलजंतुभिः स्वयं नासितश्च ॥ १७ ॥ क्वचिन्मोहमिति। मृत्युमृत्युमिव ॥ १८ ॥ अयुता
युतवर्षाणांइति। विष्णोर्मायया हतः आत्मा मनो यस्य तस्य मुनेस्तस्मिन्जले भ्रमतः ततः महान्काले। व्यतीयायेत्यर्थः ॥ १९ ॥ सइति। पृथिव्याः
ककुदि तद्वदुन्नतस्थले फलैः पत्रैर्वैश्च शोभितं न्यग्रोधपोतं कोमलवटवृक्षं ददर्श ॥ २० ॥ प्रागिति। तस्य न्यग्रोधपोतस्य प्रागुत्तरस्यां ईशान्यां दि
शि आस्व तस्यां शिशुमपि ददर्श। तं विशिनष्टि शयानमित्यादिना। तमोंधकारपसं तं निराकुर्वंतं ॥ २१ ॥ इंद्रनीलवच्छ्यामं श्रीमद्रम्यं वदनपंकजं य
स्य तं। कंबुवच्छंखवत्त्रिरेखा ग्रीवा यस्य तं महोरस्कं विशालवक्षसं शोभनानासा यस्य तं सुंदरे सुभ्रुवौ यस्य तं ॥ २२ ॥ निश्वासैरेजंतः कंपमानाः ; ना ५

॥ क्वचिद्भ्रतो महागर्त्ते तरलैस्ताडितः। क्वचित्। यादोभिर्भक्ष्यते क्वापि स्वयमन्योन्यघातिभिः ॥ १७ ॥ क्वचिन्मोहं क्वचिद्दुःखं क्वचिद्दुःखं क्वचिद्भ
यं क्वचिन्मृत्युमवाप्नोति व्याध्यादिभिरुतार्दितः ॥ १८ ॥ अयुतायुतवर्षाणां सहस्राणि शतानि च। व्यतीयुर्भ्रमतस्तस्मिन्विष्णुमायावृता
त्मनः ॥ १९ ॥ स कदाचिद्भ्रमंस्तस्मिन्पृथिव्याः ककुदि द्विजः। न्यग्रोधपोतं ददृशे फलपल्लवशोभितं ॥ २० ॥ प्रागुत्तरस्यां शाखायां तस्यापि ददृशे शिशुं
शयानं पर्णपुटके ग्रसंतं प्रभया तमः ॥ २१ ॥ महामरकतश्यामं श्रीमद्वदनपंकजं। कंबुग्रीवं महोरस्कं सुनासं सुंदरभ्रुवं ॥ २२ ॥ श्वासैजदलका
भातं कंबुश्रीकर्णदाडिमं। विद्रुमाधरभासेषच्छोणायितसुधास्मितं ॥ २३ ॥ पद्मगर्भारुणापांगं हृद्यहासावलोकनं। श्वासैजद्वलिसंवि
ग्ननिम्ननाभिदलोदरं ॥ २४ ॥ चार्वंगुलिभ्यां पाणिभ्यामुन्नीय चरणांबुजं। मुखे निधाय विप्रेंद्रो धयंतं वीक्ष्य विस्मितः ॥ २५ ॥

ः अलकास्तैर्भातं शोभितं। कंबुवद्दंतवर्त्तलयेन श्रीर्ययोस्तौ कंबुश्रियौ तयोः कर्णयोर्दाडिमपुष्पसदृशमाभरणं यस्य तं विद्रुमवद्योधरस्त
स्य भासा ईषच्छोणायितं शुविशुद्धं स्मितं यस्य तं ॥ २३ ॥ पद्मगर्भवदरुणावपांगौ नेत्रांतौ यस्य तं हृद्यं हासयुक्तमवलोकनं यस्य श्वासैरेजंत्यः चलंत्यः व
लयस्त्रिरेखाः ताभिः संविग्नं चलानि निम्ना च नाभिर्यस्मिन् तदश्वत्थपत्रसंकाशं उदरं यस्य तं ॥ २४ ॥ चारवः सुंदराः अंगुलयो ययोस्ताभ्यां
पाणिभ्यां स्वचरणांबुजमुन्नीय उद्धृत्य मुखे निधाय तदंगुष्ठं धयंतं पिबंतं इत्यर्थः तं शिशुं विलोक्य विस्मितो बभूवेत्यर्थः ॥ २५ ॥

तं वायुमनु बलाहकामेघाः करालान्नयंकरा अभवन्नाविर्बभूवुः ॥ ते च तडिद्भिः सहितास्त्वैर्ध्वनंतो गर्जंत । अत्यन्तः शकटाक्षाः तद्वस्थविक्षाः स्थू
लाश्रितिलोवर्षधारामुमुचुः ॥ ११ ॥ तत इति चतुर्दिक्षु वर्तमानाः समुद्राः परितः क्ष्मातलं भूमंडलं । उग्रानक्रायेषु ते समीरवेगोत्थिते रूर्मिभिर्प्लुसं
तः नयात्मका आवर्ता येषु गम्भीरघोषो येषु ते च ते च ते व्यहरन्प्लुतं ॥ १२ ॥ अंतरीति । खरैरित्यत्र सूर्यरश्मिभिरिवेति शेषः । शाहृता निर्विद्युत्भिर्छंदोनु
सारेणदीर्घत्वमार्षं । अत्तिद्युभिरतिक्ष्णां तां घोर्याभिस्ताभिरद्भिर्जलैश्चांतर्बहिरुपतापितं चतुर्विधं देवतिर्यङ्मनुष्यस्थावरात्मकं जगज्जलाप्लुतं
क्ष्मां भूमिं च वीक्ष्य मुनिर्विमनाः समत्र सदनेषीत ॥ १३ ॥ तस्येति तस्य मुनेरित्यमुद्वीक्षतः सतः वर्षैरंबुदैरापूर्यमाणः प्रभंजनेन वायुनाघूर्णि

तं चंडशब्दं समुदीरयंतं बलाहका अन्वभवन्करालाः ॥ अत्यन्तस्थविक्षामुमुचुस्तडिद्भिः स्वनंतश्चैरतिवर्षधाराः ॥ ११ ॥ ततो व्यहरत्प्लुतं च वु
समुद्राः समंततः क्ष्मातलमाप्लुसंतः ॥ समीरवेगोर्मिभिरुग्रनक्रैर्महान्नयावर्तगभीरघोषाः ॥ १२ ॥ अंतर्बहिश्चाद्भिरतिद्युभिः खरैः शातह्र
दाभीरुपतापितं जगत् ॥ चतुर्विधं वीक्ष्य महात्मनामुनिर्जलाप्लुतां क्ष्मां विमनाः समत्रसत् ॥ १३ ॥ तस्यैवमुद्वीक्षत ऊर्मिभीषणः प्रभंजना
घूर्णितवार्महार्णवः ॥ आपूर्यमाणो वर्षद्भिरंबुदैः क्ष्मामप्यधाद्द्वीपवर्षाचलैः समं ॥ १४ ॥ स क्ष्मांतरिक्षं सदिवं सभागणं त्रैलोक्यमा
सीत्सहदिग्भिराप्लुतं ॥ स एक एवोर्वरितो महामुनिर्बभ्राम विक्षिप्य जटा जडांधवत् ॥ १५ ॥ क्षुत्तृट्परीतो मकरैस्तिमिंगिलैरुपद्रुतो वीचि
नभस्वताहतः ॥ तमस्यपारे पतितो भ्रमन्दिशो न वेद खं गां च परिश्रमेषितः ॥ १६ ॥ श्री ॥

तस्यामितं बाहरदंकं यस्मिन् ऊर्मिभिर्वीषणः प्रभंजनाघूर्णितवार्महार्णवः द्वीपवर्षाद्रिभिः समं सह सहितामित्यर्थः । क्ष्मामप्यधाच्छादयामास ॥ १४ ॥ स क्ष्मांतरिक्षमि
ति ॥ क्ष्मांतरिक्षसदिवं दिवा सहितं सदिवं स्वर्गसहितं सभागणं नक्षत्रगणसहितं त्रैलोक्यमद्भिराप्लुतमासीत्तदा स मुनिरेक एवोर्वरितः अवशेषितः ॥ वि
क्षिप्य जटायेन सः जडवद्वधवच्च विचचार ॥ १५ ॥ किंच ॥ क्षुत्तृड्भ्यां परीतो व्याप्तः ॥ तृतीयांतपाठे मकराद्दीनां विशेषणं वीचिभिस्तरंगैर्नभस्वता वायुना
च हतः ताडितः ॥ अत एव परिश्रमेणेषितो व्याप्तः ॥ दिव मंनरिक्षं खं वमाकाशं गां भूमिं च न वेद ॥ १६ ॥

भा० द्वा० टी०
३४

चिंत्येति नेत्राभ्यां हृदि वेष्टितमालिंगितं बालकमधोक्षजं पुनर्बहिः परिष्वक्तुं अभ्ययात् अभिमुखं जगाम ॥ ३२ ॥ तावदिति तावद्भगवानचिं
त्यविविधधविचित्रश्लक्ष्णादिगुणगणपूर्णः योगाधीशः आश्चर्यशक्तियोगनिर्वाहकः गुहाशयः सर्वांतरात्मा तर्हि बालत्वाकृष्टेरीहा
लिंगनेच्छायथाः नीशानिर्मितानिर्वर्तनेन कृता तद्वासीदित्यर्थः ॥ ३३ ॥ तमिति तं तिरोदधे तं शिशुं मनुलोकसंप्लवं सलिलं तिरोधायत तद्ह
णात्तस्य मुनेः स काशादरोप्यत ईधइति पूर्वेण संबंधः यद्वा भगवान् सलिलं तिरोधायांतर्दधे तमनुवटोप्यंतर्दधे इति संबंधः मुनिस्तु स्वाश्रम
मे पूर्ववत् स्थितः अल्पदेशे विपुलदेशांतर्भाव अल्पकाले बहुकालांतर्भाव तदितरजनादृश्यत्व अतिरिक्तमूर्त्तामूर्त्तपदार्थव्रातदेतुतं

अथ तं बालकं दृष्ट्वा नेत्राभ्यां विष्टितं हृदि अभ्ययादतिसंक्लिष्टः परिष्वक्तुमधोक्षजं ॥ ३२ ॥ तावत्स भगवान् साक्षाद्योगाधीशो गुहाशयः
अंतर्दधे ऋषेः सद्यो यथेहानीशनिर्मिता ॥ ३३ ॥ तमन्वथ वटो ब्रह्मन् सलिलं लोकसंप्लवः तिरोधापि क्षणेनासौ पि स्वाश्रमे पूर्ववत् स्थितः
३४ इति श्रीमद्भा० द्वादशस्कंधे मार्कंडेयस्य मायामोहनं नाम नवमोऽध्यायः ॥ ९ ॥ सूत उवाच ॥ ॥ स एवमनुभूयेदं नारा
यणविनिर्मितं वैभवं योगमायायास्तमेव शरणं ययौ ॥ १ ॥ मार्कंडेय उ० प्रपन्नोस्म्यंघ्रिमूलं ते प्रपन्नाभयदं हरे यन्मायया पि विबुधा मु
ह्यंति ज्ञानकातराः ॥ २ ॥ सूत उ० तमेवं निभृतात्मानं वृषेण दिवि पर्यटन् रुद्राण्या भगवान् रुद्रो ददर्श स्वगणैर्वृतः ॥ ३ ॥

प्रत्युक्तिसर्वमीश्वरस्य सर्वशक्तित्वादुपपन्नं ॥ ३४ ॥ इति द्वादशे नवमः ॥ ९ ॥ इत्थं भगवता स्वयं योगमायादर्शनात्मकं वरं प्राप्य ततो रुद्राद्भगवद्भक्ति
स्थैर्यमाकर्ण्यांतमाद्युक्तेकालिकं ज्ञानं विषयकं ब्रह्मवर्चस्विनां पुराणाचार्यत्वं लेभ इति वक्तुं प्रस्तौति स एवेत्यादिना ॥ नारायणेन विनिर्मि
तमाश्चर्यशक्तेर्वैभवं दृष्ट्वा तं मनुभूयतमेव नारायणमेव तन्मायातरणाय शरणं ययौ ॥ १ ॥ तदेवाह प्रपन्नोस्मीति प्रपन्नानामभयं संस
तिभयाभावं ददातीति तथा यस्य तव मायया हेतुभूतया यावज्ज्ञानं तेन कातरा विक्लिष्टचित्ताः संतो मुह्यंति तां तर्तुं प्रपन्नोस्मीति भावः
॥ २ ॥ तमिति इत्थं निभृतात्मानं समाहितचित्तं मुनिं रुद्रो ददर्शेति संबंधः दिव्यंतरिक्षे ॥ ३ ॥

तद्दर्शनेति तस्य शिशोर्दर्शनेन वीतो गतः परिश्रमो यस्य इत्यर्थः । स ॥ प्रोत्फुल्लहृत्पद्मविलोचनांबुजेचयस्य स । अद्भुतभावेनात्माश्चर्यरूपेण
शंकितो पितं बालकं द्रष्टुं पुरः संसार समीपं गतः ॥ २६ ॥ तावत्तदा हेतावेव स मुनिः शिशोः । श्वसितेन मशकवदंतः शरीरमाविशत् शिशोः श्वास
वातेन तच्छरीरांतः प्राविशदित्यर्थः । तत्रापि तत्कुक्षौ न्यस्तं तन्नथाविधं शिशुमचष्ट यथापुरा तच्छरीरांतः प्रवेशात्पूर्वं यथा कृत्स्नमाचष्ट तद्वत्
एवं दृष्ट्वातीव विस्मितो मुमोह ॥ २७ ॥ कृत्स्नशो दर्शनं प्रपंचयति ॥ खमंतरिक्षं रोदसी द्यावापृथिव्यौ भगणान् नक्षत्रगणान् द्वीपान् सागरांश्च ता
न्ककुभो दिशः सुरासुरांश्च तान् पुराणि हढादिमंति आकरान् रत्नाद्युत्पत्तिस्थानानि खेटान् कर्षकग्रामान् व्रजान् गोष्ठान् निआश्रमांश्च ॥
तैदृ

तद्दर्शनाद्वीतपरिश्रमो मुदा प्रोत्फुल्लहृत्पद्मविलोचनांबुजः ॥ प्रहृष्टरोमाद्भुतभावशंकितो द्रष्टुं पुरस्तं प्रससार बालकं ॥ २६ ॥ तावच्छिशोर्वै
श्वसितेन भार्गवः सोंतःशरीरं मशको यथाविशत् तत्राप्यदो न्यस्तमचष्ट कृत्स्नशो यथा पुरामुह्यदतीव विस्मितः ॥ २७ ॥ खं रोदसी भगणा
